29°

Tibetan Sanskrit Works Series

Published under the Partonage
of
The Government of the State of Bihar

MADHYĀNTA-VIBHĀGA-BHĀṢYA

Deciphered & Edited by

DR. NATHMAL TATIA,
Director,
&
PROF. ANANTALAL THAKUR,
RESEARCH INSTITUTE OF
PRAKRIT, JAINOLOGY AND AHIMSA
VAISHALI

K. P. Jayaswal Researc'' Institute, Patna

Published by

PROF. S. H. ASKARI, M. A., B. L.,
HONORARY JOINT DIRECTOR
KASHI PRASAD JAYASWAL RESEARCH INSTITUTE
PATNA

1967

PRINTED IN INDIA
BY GAURISHANKAR MISHRA AT DARBHANGA PRESS CO. PRI. LTD.
DARBHANGA

भोटदेशीयसंस्कृतग्रन्थमाला
दशमं पुष्पम्

मध्यान्तविभागभाष्यम्

वसुबन्धुकृतम्

कारिकाकृत् = असङ्गः। उपदेष्टा = आर्यमैत्रेयः।

प्राकृतजैनशास्त्रविद्यापीठप्रधानेन
श्रीमन्नथमलटाटियामहोदयेन
तत्रत्यप्राध्यापकेन
श्रीमदनन्तलालठक्कुरेण
च
सम्पादितम्

काशीप्रसादजायसवालअनुशीलनसंस्थानम्
पाटलिपुत्रम्

संवत् २०२४ मूल्यं रूप्यकचतुष्टयम्

Tibetan Sanskrit Works Series

Published under the Partonage
of
The Government of the State of Bihar

GENERAL EDITOR
PROF. S. H. ASKARI, M. A., B. L.,
HONORARY DIRECTOR
K. P. JAYASWAL RESEARCH INSTITUTE, PATNA

VOL. X

MADHYĀNTA-VIBHĀGA-BHĀṢYAM

EDITED BY
DR. NATHMAL TATIA,
DIRECTOR
&
PROF. ANANTALAL THAKUR
RESEARCH INSTITUTE OF PRAKRIT, JAINOLOGY AND AHIMSA
VAISHALI

K. P. JAYASWAL RESEARCH INSTITUTE
PATNA

1967 Price Rs. 4/-

net

Published by

PROF. S. H. ASKARI, M. A., B. L.,

HONORARY JOINT DIRECTOR

KASHI PRASAD JAYASWAL RESEARCH INSTITUTE

PATNA

1967

PRINTED IN INDIA

BY GAURISHANKAR MISHRA AT DARBHANGA PRESS CO. PRI. LTD.

DARBHANGA

भोटदेशीयसंस्कृतग्रन्थमाला
दशमं पुष्पम्

मध्यान्तविभागभाष्यम्

वसुबन्धुकृतम्

कारिकाकृत् = असङ्गः । उपदेष्टा = आर्यमैत्रेयः ।

प्राकृतजैनशास्त्रविद्यापीठप्रधानेन
श्रीमन्नथमलटाटियामहोदयेन
तत्रत्यप्राध्यापकेन
श्रीमदनन्तलालठक्कुरेण
च
सम्पादितम्

काशीप्रसादजायसवालअनुशीलनसंस्थानम्
पाटलिपुत्रम्

संवत् २०२४

मूल्यं रूप्यकचतुष्टयम्

Preface of the General Editor

All those who have scholarly interests in Buddhistic studies would welcome the publication of the texts of original manuscripts which throw light on some aspects of Buddhist religion and philosophy and will remember with gratitude the contribution of the late lamented Mahapandita Rahul Sankrityayan. He discovered in Tibetan monasteries the rich materials which a careful posterity had managed to preserve and this was made accessible to the scholars by that great Indologist. Among the photostat copies of the palm-leaf manuscripts that he had brought in 1937 from the monastery at Ngor in Tibet and presented to the Bihar Research Society, Patna, there was a short treatise named Madhyāntavibhāgabhāṣya, written in Proto-Maithili-cum-Bengali script prevalent in the 11th & 12th centuries in North Eastern India.

The text of the manuscript, carefully deciphered and very ably and critically edited by Dr. Nathmal Tatia, Director and Prof. A. L. Thakur of the Research Institute of Prakrit, Jainology and Ahimsa, Vaishali—has been published under the auspices of the K. P. Jayaswal Research Institute, a research organisation that already has for its credit several important publications. The Institute feels indebted to Bihar Research Society for lending this manuscript for its publication. While offering the slim volume to the readers, I feel pleasure in performing a task which devolves on me as one in charge of the Institute. But the pleasure is mixed up with regret as the late Dr. A.S. Altekar, who selected the manuscript for publication in Jan. 1956, and who was better equipped to appreciate its value and importance, is no longer with us. May his soul rest in peace !

12th May, 1967 *S. H. Askari.*

1. The Government of Bihar established the K. P. Jayaswal Research Institute at Patna in 1951 with the object *inter alia* to promote historical research, archaeological excavation and investigations and publication of works of permanent value to scholars. This Institute along with the five others was planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted. Apart from the Kashi Prasad Jayaswal Research Institute, five others have been established to give incentive to research and advancement of knowledge—the Nalanda Institute of Post-Graduate Studies and Research in Pali and Buddhist Learning at Nalanda, the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga, The Bihar Rashtrabhasha Parishad for advanced Studies and Research in Hindi at Patna, the Research Institute of Prakrit Jainology and Ahimsa at Vaishali and the Institute of Post-Graduate Studies and Research in Arabic and Persian Learning at Patna.

2. As a part of this programme of rehabilitating and reorientating ancient learning and scholarship, the K. P. Jayaswal Research Institute has undertaken the editing and publication of the Tibetan Sanskrit Text Series with the co-operation of scholars in Bihar and outside. Another Series of Historical Research Works for elucidating the history and culture of Bihar and India has also been started by the Institute. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

1. The Government of Bihar established the K. P. Jayaswal Research Institute at Patna in 1951 with the object inter alia, to promote historical research, archaeological excavation and investigations and publication of works of permanent value to scholars. This Institute along with five others, was planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted. Apart from, the Kashi Prasad Jayaswal Research Institute, five others have been established to give incentive to research and advancement of knowledge—the Nalanda Institute of Post-Graduate Studies and Research in Pali and Buddhist Learning at Nalanda, the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga, the Bihar Rashtrabhasha Parishad for advanced Studies and Research in Hindi at Patna, the Research Institute of Prakrit Jainology and Ahimsa at Vaishali and the Institute of Post-Graduate Studies and Research in Arabic and Persian Learning at Patna.

2. As a part of this programme of rehabilitating and reorientating ancient learning and scholarship, the K. P. Jayaswal Research Institute has undertaken the editing and publication of the Tibetan Sanskrit Text Series with the co-operation of scholars in Bihar and outside. Another Series of Historical Research Works, embodying the history and culture of Bihar and India has also been started by the Institute. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

Introduction

The present text of the Madhyāntavibhāgabhāṣya is based on a photostat copy of a palm-leaf Ms. preserved at the monastery of Ngor and discovered by Mahāpaṇḍita Rāhula Sānkrityāyana in 1934. The original manuscript is written in Proto-Maithili-cum-Bengali script prevalent in the 11th-12th centuries and is complete in 30 folia, each of the size of 10⅜ x 2 inches. Each side of a folio contains six lines (folio 5b has seven) of about 70 syllables each. There is a gap of about six syllables in the lines, except the first and last, around the string hole. The obverse side of the first folio is blank as usual and that of the 30th has two lines only, the reverse escaping the camera. The photostat copy was given to us by Dr. A. S. Altekar in 1956 for decipherment and editing. On account of various preoccupations the progress was very slow and we could prepare the press copy only in 1962. The printing of the text was finished in 1963, and we were preparing to write an introduction to the book. But to our surprise and disappointment, we discovered that the text was already published by Prof. G. M. Nagao from Tokyo. We have since compared our text with that published by Prof. Nagao and we are encouraged to find that our humble attempt was successful though we lacked in knowledge of Tibetan and Chinese unlike Prof Nagao and his assistants.

Our success, to a great extent, was due to Prof. Yamaguchi's excellent edition of the *Madhyāntavibhāgaṭīkā* of Ācārya Sthiramati. Moreover, the manuscript is very carefully written, which facilitated our decipherment without any reference to Chinese and Tibetan versions.

The texts, which consist of Kārikās ascribed to Ārya Maitreyanāthapāda and the Bhāṣya composed by Ācārya Vasubandhu, are written in classical Sanskrit with some words in Buddhist Sanskrit which is a legacy of Pali and Prakrits used by earlier Buddhist authors. We have not followed the orthographic peculiarities of the manuscript, such as doubling of consonants after 'r', various changes of *anusvāra*, etc. We had to give our own punctuation marks, as those in the manuscript are indiscriminate, exhibiting the indifference of the ancient scribes in this regard. These changes are made in order to make the text presentable to a modern scholar of philosophy with a knowledge of classical Sanskrit.

We have divided the texts into chapters and sections according to the subject matter coming under them, guided by the colophons of the texts and also the above mentioned work of Prof. Yamaguchi. The basic Kārikās are printed in bold type, though it has not always been possible to be sure about their numbering. The opening verse on page no. 1 has not been numbered as it belongs to the *Bhāṣya*, though printed in bold types.

As regards the authorship of the texts, the tradition, as recorded in the opening verse of the Bhāṣya and explained in the *Ṭīkā*, says that Maitreyanātha is the *praṇetā* and Ārya Asaṅga is the *vaktā* of the *Madhyāntavibhāgakārikā*, Vasubandhu and others being the disciples to whom the *Kārikāśāstra* was addressed. Vasubandhu is the author of the *Bhāṣya* which expounds the *Kārikāśāstra*. This tradition is further supported by the following verse of the *Sākārasiddhiśāstra* of Jñānaśrīmitra :

āryāsaṅgam anaṅgajinnayavaho yadbhūpatīśo'nvaśāt

ācāryo vasubandhur uddhuramatis tasyājñayādidyutat /

dignāgo'tha kumāranāthavihitāsāmānyasāhāyakas
tasmin vārtikabhāṣyakārakṛtinor adyā'navadyā sthitiḥ //
Jñānaśrīmitranibandhāvali P. 506.

In this verse, the word Bhūpatīśa who is characterized as anaṅgajinnayavahaḥ (i. e. the promulgator of the philosophy of the Buddha who vanquished the Māra) stands for Maitreyanātha whose disciple was Ārya Asaṅga. The other eminent Ācāryas mentioned in the above verse are Vasubandhu, Dignāga with his collaborator Kumāranātha, Dharmakīrti and Prajñākaragupta who were shining luminaries in the firmament of Buddhist philosophy and logic. It should be mentioned in this connection that Jñānaśrīmitra respectfully refers to the Madhyāntavibhāga, its Bhāṣya and Ṭīkā separately, in connection with his exposition of the Sākāravāda philosophy which, according to him, is based on these texts.

The book is divided into five chapters with sub-sections. In the first chapter, called Lakṣaṇapariccheda, the character of *śūayatā* is expounded. The knower and the known are mere concepts (*vikalpa*). The concept is false ideation (*abhūtaparikalpa*). *Śūnyatā* is the basis of this false ideation. If what is not existent in a particular locus is realized as such, this is a case of true cognition. What is left after being denuded of the false concepts is the real. And this is how one can understand the character of *śūnyatā*[1]. Nothing is śūnya or aśūnya without reference to something else. This is called *sallakṣaṇa* and *asallakṣaṇa* of false ideation. The word *lakṣaṇa* is used in a wider sense to include the varieties, the functions, the aspect of defilement, the aspect of purification, and so on.

---

1. evam yad yatra nā'sti tat tena śūnyam iti yathābhūtaṃ samanupaśyati. yat punar atrāvaśiṣṭaṃ bhavati tat sad ihā 'stī'ti yathābhūtaṃ prajānātī'ty aviparītaṃ śūnyatālakṣaṇam udbhāvitaṃ bhavati.
M V Bhāṣya—P. 2.

The second chapter deals with *āvaraṇa* i. e., cover which is mainly twofold viz. *kleśāvaraṇa* and *jñeyāvaraṇa*. In brief, what covers the potential powers of the consciousness is *āvaraṇa*, the removal of which stands for *mukti*[2].

The third chapter deals with *tattva* which is briefly twofold viz. *ādarśatattva* and *dṛśyatattva*. The former is *mūlatattva* in which the *dṛśyatattva* is reflected.

The fourth chapter deals with the *pratipakṣabhāvanā*, *avasthā* and *phala*. The *pratipakṣabhāvanā* is broadly of three kinds, realised in the states of *pṛthagjana*, *śaikṣa* and *aśaikṣa*. The spiritual distinction between persons as *gotrastha*, *avatīrṇa* etc. is made on the basis of the *avasthās*. The *phala* is of five kinds viz. *vipākaphala*, *adhipatiphala*, *niṣyandaphala*, *puruṣakāraphala* and *visaṃyogaphala*. The first stands for the fruition of good acts done in the past. The second stands for the spiritual strength acquired on account of the predominance of the *kuśalamūla*. The third *phala* refers to the predilection of the spiritual aspirant for good acts. The fourth, viz. *puruṣakāraphala*, means ripening of *kuśalamūla* on account of its sustained practice. The last, i. e. the *visaṃyogaphala*, is identical with *mukti*, the utter dissociation of all covers.

The last chapter is concerned with *ānuttarya* which is threefold viz. *pratipattyānuttarya*, *ālambanānuttarya* and *samudāgamānuttarya* The first refers to the practice of the ten *pāramitās*. The second refers to the twelve kinds of *ālambanas*. The third, viz. the *samudāgamānuttarya*, is of ten kinds and is concerned with the attainments of *gotra*, strong belief in *Mahāyāna*, discarding of *Hīnayāna*, fulfilment of *pāramitās* and so on.

---

2. kleśāvaraṇam ākhyātaṃ jñeyāvaraṇam eva ca/
sarvāṇy' āvaraṇānī'ha yatkṣayān muktir iṣyate//

M V Kārikā, II. 17

We are thankful to the authorities of the K. P. Jayaswal Research Institute, specially to the late Dr. A. S. Altekar and Prof. S. H. Askari, the General Editor, Tibetan Sanskrit Works Series, who entrusted the work to us. We crave the indulgence of the reader for a few printing mistakes that have unfortunately crept into the text in spite of our best efforts. Our list of corrigenda has been facilitated by Professor Nagao's excellent edition which provoked reconsideration of some doubtful cases illegible in the manuscript. It is therefore our duty to express profound gratitude to the learned scholar.

Research Institute of Prakrit,
Jainology and Ahimsā, Vaishali
May 12, 1967

Nathmal Tatia
Anantalal Thakur

॥ शुद्धिपत्रम् ॥

पृष्ठसंख्या	पंक्तिसंख्या	अशुद्धपाठः	शुद्धपाठः
१	९	सप्तार्थाश्चा°	सप्तार्थाह्य°
२	५	शून्यतया····द्वयेन	शून्यतया चाभूतपरिकल्पेन च । न चाशून्यं द्वयेन
४	१८	°रूपेणात्म°	°रूपेणात्म°
४	१९	। कर्मांक्षिप्तस्य पुनर्भवस्य	कर्माक्षिप्तस्य पुनर्भवस्य ।
५	९	°मरणानि	मरणे
,,	९	पिण्डार्थः ।	पिण्डार्थः
,,	२१	वाभावः	चाभावः
६	७	विज्ञयः	विज्ञेयः
,,	६	स्वभावान्यता ।[1]	स्वभावान्य[1] [5a] त्वं भवति ।
७	१७	तस्य शून्यताशून्यता	तस्य [शून्यता] शून्यताशून्यता
,,	२०	सर्वधर्म°	तासर्वधर्म°
,,	२१	[5a] तं भवति	०
९	४	नान्या	सान्या
१०	२	तत्रतया	तत्रैतया
११	५	तद्	तत्र
१३	२२	प्रसवनात्, अल्पश्रुत्वं,	प्रभवनात्, अल्पश्रुतत्वं,
१४	२१	पुनस्त्रीणि	सर्वाणि
१४	२३	त्त्रस्तेन शासनधर्मेषु	त्रस्तमानसेन धर्मेषु
१५	१	प्राप्तुं धर्मामत्सरित्वेन	प्राप्तवान् सर्वधर्म-
१६	५	विबन्धा°	विपक्षा°
,,	६	°यथावत	°यथारुतं
,,	१३	प्रतिपक्षान्तभू°	प्रतिपक्षास्तु भू°

पृष्ठसंख्या	पंक्तिसंख्या	अशुद्धपाठः	शुद्धपाठः
१७	१४	°हेतुत्वाधि°	हेत्वधि°
१८	११	ग्रन्थ°	अध्व°
१९	१५–१६	। मूल····क्रमं	मूल·······क्रमम् ।
२१	६	ताख्यः	ता च[1]
,,	११-१२	परिज्ञा°····स्थानं	परिज्ञानप्रहाणसाक्षात्क्रियायां मार्गसत्यव्यवस्थानं त्रिवि[धं]
,,	२०	या	ख्यः
२३	१४	°मत्त्वं···यैत्र	°सत्यं च यथासंख्यं यैत्र
२४	७	°शुद्धाश्रये	शुद्ध्याश्रये
,,	९	आत्मसद्	आत्मासद्
२६	२१	ज्ञेयादि°	रूपादि°
,,	२३	वि[ष]य°	उप°
२७	६	प्रत्युत्पन्नो	प्रत्युत्पन्नोऽध्वा
२८	८	यच्च	यश्च
३०	११	प्रहाणापकर्षार्थमष्टौ	प्रहाणाय कथमष्टौ
३०	२०	°त्यावबोधः	त्यानुबोधः
३१	१०	लेखाद्	हि संलेखाद्
,,	११	°निर्देशः	निर्देशो यस्मात्
,,	१२	यस्मात्	०
३१	१७	बलावस्थावाम्	बलावस्थायाम्
३२	९	°हेतुत्वात	°हेतुकत्वात्
,,	१२	°ङ्गाणि	°ङ्गानि
३४	६	उत्पादितबोधिचित्तस्य ।	। उत्पादितबोधिचित्तस्य
३६	४	श्रोतः	गोत्र°
३७	११	परमार्थ····°धर्मान्त°	परमाथमनस्कारे अनु····°धर्मऽन्त°
,,	१६	ततः	तत्र
३८	२, ५, ११	विभुत्व°	वित्तत्व°

पृष्ठसंख्या	पंक्तिसंख्या	अशुद्धपाठः	शुद्ध पाठः
३९	२	सत्त्वानाम्	सामर्थ्यम्
४०	१५	°मात्र तूप°	°मात् अनुप°
४१	९	परिच्छेदे	परिज्ञेयो
,,	१०	°त्पादस्तत्र सहेतुः	यो बोधिसत्त्वेन
,,	१८	°दौष्ठुल्य	अशुद्ध°
४२	९-१०	°विपर्यासः। ····ग्राहकाभा[2]वात्।	°विपर्यासः, ····ग्राहकाभा[2]वात्,
४४	१५	विशिष्टता	अविशिष्टता
,,	१८	येन	येन च
४५	१९	द्विधर्मता	द्विधा त्रिधा
४६	१	°नास्य तद्ग्रहः	त्रास्य-तद्द्वये
,,	३	सविकल्पा द्व°	सविकल्पद्व°
,,	५	मया	या
४७	२	ज्ञान°	ज्ञाना°
४८	१६	ततो	तथा
५०	१-२	अस्य परि°	आद्यपर°
,,	३	ग्रहः	गूढं
,,	१५	विक्षेप°	अविक्षेप°
,,	१६	येऽत्र	यत्र
५१	३	°प्रकृति	°प्रकृतिं
,,	३	तदावरणप्रहीणतां	तदावरणप्रहीणाप्रहीणतां

मध्यान्तविभागभाष्यम्

लक्षणपरिच्छेदः प्रथमः

[1b] ओं नमो बुद्धाय

शास्त्रस्यास्य प्रणेतारमभ्यर्ह्य सुगतात्मजम् ।
वक्तारं चास्मदादिभ्यो यतिष्येऽर्थविवेचने ॥

१. शास्त्रशरीरम्

तत्रादितः शास्त्रशरीरं व्यवस्थाप्यते—

लक्षणं ह्यावृति[1]स्तत्त्वं प्रतिपक्षस्य भावना ।
तत्रावस्था फलप्राप्तिर्यानानुत्तर्यमेव च ॥१॥

इत्येते सप्तार्थाश्चास्मिन् शास्त्र उपदिश्यन्ते। यदुत लक्षणमावरणं तत्त्वं प्रतिपक्षस्य भावना तस्यामेव च प्रतिपक्षभावनायामवस्था फलप्राप्तिर्यानानुत्तर्यं च सप्तमोऽर्थः ॥

२. शून्यतालक्षणम्

तत्र लक्षणमारभ्याह—

अभूतपरिकल्पोऽस्ति द्वयं तत्र न विद्यते ।
शून्यता विद्यते त्वत्र तस्यामपि स विद्यते ॥२॥

तत्राभूतपरिकल्पो ग्राह्यग्राहकविकल्पः। द्वयं ग्राह्यं ग्राहकं च। शून्यता तस्याभूतपरिकल्पस्य ग्राह्यग्राहकभावेन विरहितता। तस्यामपि स विद्यत इत्यभूतपरिकल्पः।

---

१. Ms. त्ति।

एवं यद्यत्र नास्ति तत्तेन शून्यमिति यथाभूतं समनुपश्यति। यत्पुनरत्रावशिष्टं भवति तत्स[1]दिहास्तीति यथाभूतं प्रजानातीत्यविपरीतं शून्यतालक्षणमुद्भावितं भवति ॥

न शून्यं नापि चाशून्यं तस्मात् सर्वं विधीयते।
सत्त्वादसत्त्वात् सत्त्वाच्च मध्यमाप्रतिपच्च सा ॥३॥

न शून्यं शून्यतया वाभूतपरिकल्पेन वा न वा शून्यद्वयेन ग्राह्येण[2] ग्राहकेण च, सर्वं सं[2a]स्कृतं चाभूतपरिकल्पाख्यमसंस्कृतं च शून्यताख्यं विधीयते निर्दिश्यते। सत्त्वादभूतपरिकल्पस्य, असत्त्वाद्द्वयस्य, सत्त्वाच्च शून्यताया अभूतपरिकल्पे, तस्यां चाभूतपरिकल्पस्य, सा च मध्यमाप्रतिपद् यत् सर्वं नैकान्तेन शून्यं नैकान्तेनाशून्यम्। एवमयं पाठः प्र ज्ञा पा र मि ता दिष्वनुलोमितो भवति—सर्वमिदं न शून्यं नापि चाशून्यमिति ॥

एवमभूतपरिकल्पस्य सल्लक्षणमसल्लक्षणं च ख्यापयित्वा स्वलक्षणं ख्यापयति—

अर्थसत्त्वात्मविज्ञप्तिप्रतिभासं प्रजायते।
विज्ञानं नास्ति चास्यार्थस्तदभावात्तदप्यसत् ॥४॥

तत्रार्थप्रतिभासं यद्रूपादिभावेन प्रतिभासते। सत्त्वप्रतिभासं यत्पञ्चेन्द्रियत्वेन स्वपरसन्तानयोः। आत्मप्रतिभासं क्लिष्टं मन आत्ममोहादिसंप्रयोगात्। विज्ञप्तिप्रतिभासं षड्विज्ञानानि। नास्ति चास्यार्थ इत्यर्थसत्त्वप्रतिभासस्यानाकारत्वात्, आत्मविज्ञप्तिप्रतिभासस्य च वितथप्रतिभासत्वात्। तदभावात्तदप्यसदिति यत्तद्ग्राह्यं रूपादि पञ्चेन्द्रियं मनः षड्विज्ञानसंज्ञकं चतुर्विधं, तस्य ग्राह्यस्यार्थस्याभावात् तदपि ग्राहकं विज्ञानमसत् ॥

अभूतपरिकल्पत्वं सिद्धमस्य भवत्यतः।
न तथा सर्वथा[2b]भावात्

यस्मान्न तथास्य भावो यथा प्रतिभास उत्पद्यते। न च सर्वथाभावो भ्रान्तिमात्रस्योत्पादात् ॥

१. Ms. adds हि after स। २. Ms. न।

किमर्थं पुनस्तस्याभाव एव नेष्यते। यस्मात्—

तत्क्षयान्मुक्तिरिष्यते ॥५॥

अन्यथा न बन्धो न मोक्षः प्रसिध्येदिति संक्लेशव्यवदानापवाददोषः स्यात् ॥

एवमभूतपरिकल्पस्य स्वलक्षणं ख्यापयित्वा संग्रहलक्षणं ख्यापयति, अभूतपरिकल्पमात्रे सति यथा त्रयाणां स्वभावानां संग्रहो भवति—

कल्पितः परतन्त्रश्च परिनिष्पन्न एव च।
अर्थादभूतकल्पाच्च द्वयाभावाच्च देशितः ॥६॥

अर्थः परिकल्पितः स्वभावः। अभूतपरिकल्पः परतन्त्रः स्वभावः। ग्राह्यग्राहकाभावः परिनिष्पन्नः स्वभावः ॥

इदानीं तस्मिन्नेवाभूतपरिकल्पेऽसल्लक्षणानुप्रवेशोपायलक्षणं परिदीपयति—

उपलब्धिं समाश्रित्य नोपलब्धिः प्रजायते।
नोपलब्धिं समाश्रित्य नोपलब्धिः प्रजायते ॥७॥

विज्ञप्तिमात्रोपलब्धिं निश्रित्यार्थानुपलब्धिर्जायते। अर्थानुपलब्धिं निश्रित्य विज्ञप्तिमात्रस्याप्यनुपलब्धिर्जायते। एवमसल्लक्षणं ग्राह्यग्राहकयोः प्रविशति ॥

उपलब्धेस्ततः सिद्धा नोपलब्धिस्वभावता।

उपलभ्यार्थाभाव उपलब्ध्ययोगात् ॥

तस्माच्च समता ज्ञेया नो[3a]पलम्भोपलम्भयोः ॥८॥

उपलब्धेरुपलब्धित्वेनासिद्धत्वात्। अभूतार्थप्रतिभासतया तूपलब्धिरित्युच्यते अनुपलब्धिस्वभावापि सती ॥

तस्यैवेदानीमभूतपरिकल्पस्य प्र[1]भेदलक्षणं ख्यापयति—

१. Ms. प्रति° for प्र°।

अभूतपरिकल्पश्च चित्तचैत्तास्त्रिधातुकाः ।

कामरूपारूप्यावचरभेदेन ॥

पर्यायलक्षणं च ख्यापयति—

तत्रार्थदृष्टिर्विज्ञानं तद्विशेषे तु चैतसाः ॥६॥

तत्रार्थमात्रे दृष्टिर्विज्ञानम् । अर्थविशेषे दृष्टिश्चैतसा वेदनादयः ॥

प्रवृत्तिलक्षणं च ख्यापयति—

एकं प्रत्ययविज्ञानं द्वितीयं चौपभोगिकम् ।
उपभोगपरिच्छेदप्रेरकास्तत्र चैतसाः ॥१०॥

आलयविज्ञानमन्येषां विज्ञानानां प्रत्ययत्वात्प्रत्ययविज्ञानम् । तत्प्रत्ययं प्रवृत्तिविज्ञानमौपभोगिकम् । उपभोगो वेदना । परिच्छेदः संज्ञा । प्रेरकाः संस्कारा विज्ञानस्य चेतनामनस्कारादयः ॥

संक्लेशलक्षणं च ख्यापयति—

छादनाद्रोपणाच्चैव नयनात्संपरिग्रहात् ।
पूरणात् त्रिपरिच्छेदादुपभोगाच्च कर्षणात् ॥११॥
निबन्धनादाभिमुख्याद् दुःखनात् क्लिश्यते जगत् ।

तत्र छादनादविद्यया यथाभूतदर्शनविबन्धनात् । रोपणात् संस्कारैर्विज्ञाने कर्मवासनायाः प्रतिष्ठापनात् । नयनाद् विज्ञानेनोप[3b]पत्तिस्थानसंप्रापणात् । संपरिग्रहान्नामरूपेणात्मभावस्य । पूरणात् षडायतनेन । त्रिपरिच्छेदात् स्पर्शेन । उपभोगाद्वेदनया । कर्षणात् तृष्णया । कर्माक्षिप्तस्य पुनर्भवस्य निबन्धनादुपादानैर्विज्ञानस्योत्पत्त्यनुकूलेषु कामादिषु । आभिमुख्याद् भवेन कृतस्य कर्मणः पुनर्भवे विपाकदानाभिमुखीकरणात् । दुःखनाज्जात्या जरामरणेन च, परिक्लिश्यते जगत् ॥

सोऽयम्—

त्रेधा द्वेधा च संक्लेशः सप्तधाभूतकल्पनात् ॥१२॥

त्रेधा संक्लेशः क्लेशसंक्लेशः कर्मसंक्लेशो जन्मसंक्लेशश्च। तत्र क्लेशसंक्लेशोऽविद्यातृष्णोपादानानि । कर्मसंक्लेशः संस्कारा भवश्च । जन्मसंक्लेशः शेषाण्यङ्गानि। द्वेधा संक्लेशो हेतुसंक्लेशः फलसंक्लेशश्च। तत्र हेतुसंक्लेशः क्लेशकर्मस्वभावैरङ्गैः। फलसंक्लेशश्च शेषैः। सप्तधा संक्लेशः सप्तविधो हेतुः, विपर्यासहेतुराक्षेपहेतुरुपनयहेतुः परिग्रहहेतुरुपभोगहेतुराकर्षणहेतुरुद्वेगहेतुश्च। तत्र विपर्यासहेतुरविद्या । आक्षेपहेतुः संस्काराः। उपनयहेतुर्विज्ञानम्। परिग्रहहेतुर्नामरूपषडायतने। उपभोगहेतुः स्पर्शवेदने। आकर्षणहेतुस्तृष्णोपादानभवाः। [4a]उद्वेगहेतुर्जातिजरामरणानि । सर्वश्चैष संक्लेशोऽभूतपरिकल्पात्प्रवर्तत इति पिण्डार्थः। पुनरभूतपरिकल्पस्य नवविधं लक्षणं परिदीपितं भवति। सल्लक्षणमसल्लक्षणं स्वलक्षणं संग्रहलक्षणमसल्लक्षणानुप्रवेशोपायलक्षणं प्रभेदलक्षणं पर्यायलक्षणं प्रवृत्तिलक्षणं संक्लेशलक्षणं च ॥

एवमभूतपरिकल्पं ख्यापयित्वा यथा शून्यता विज्ञेया तन्निर्दिशति—

लक्षणं चाथ पर्यायस्तदर्थो भेद एव च ।
साधनं चेति विज्ञेयं शून्यतायाः समासतः ॥१३॥

कथं लक्षणं विज्ञेयम्—

द्वयाभावो [1]ह्यभावस्य भावः शून्यस्य लक्षणम् ।

द्वय[स्य] ग्राह्यग्राहकस्याभावः। तस्य चाभावस्य भावः शून्यताया लक्षणमित्यभावस्वभावलक्षणत्वं शून्यतायाः परिदीपितं भवति ॥

यश्चासौ तद्भावस्वभावः सः—

न भावो नापि वाभावः

कथं न भावो यस्माद्द्वयस्याभावः। कथं नाभावो यस्माद्द्व[2]याभावस्य भावः। एतच्च शून्यताया लक्षणम् ॥

---

१. Ms. ह्यभावः for ह्यभावस्य भावः। २. Ms. adds भा after द्व।

तस्मादभूतपरिकल्पात्—

न पृथक्त्वैकलक्षणम् ॥१४॥

पृथक्त्वे सति धर्मादन्या धर्मतेति न युज्यते, अनित्यतादुःखतावत्। एकत्वे सति विशुद्ध्यालम्बनं ज्ञानं न स्यात् सामान्यलक्षणं च। एतेन तत्त्वान्यत्वविनिर्मुक्तं लक्षणं परिदीपितं भव[4b]ति ॥

३. शून्यताव्यवस्थानम्

कथं पर्यायो विज्ञयः—

तथता भूतकोटिश्चानिमित्तं परमार्थता।
धर्मधातुश्च पर्यायाः शून्यतायाः समासतः ॥१५॥

कथं पर्यायार्थो विज्ञेयः—

अनन्यथाविपर्यासतन्निरोधार्यगोचरैः।
हेतुत्वाच्चार्यधर्माणां पर्यायार्थो यथाक्रमम् ॥१६॥

अनन्यथार्थेन तथता नित्यं तथैवेति कृत्वा। अविपर्यासार्थेन भूतकोटिर्विपर्यासावस्तुत्वात्। निमित्तनिरोधार्थेनानिमित्तं सर्वनिमित्ताभावात्। आर्यज्ञानगोचरत्वात्परमार्थः परमज्ञानविषयत्वात्। आर्यधर्महेतुत्वाद् धर्मधातुरार्यधर्माणां तदालम्बनप्रभवत्वात्। हेत्वर्थो ह्यत्र धात्वर्थः ॥

कथं शून्यतायाः प्रभेदो ज्ञेयः—

संक्लिष्टा च विशुद्धा च

इत्यस्याः प्रभेदः ॥

कस्यामवस्थायां संक्लिष्टा, कस्यां विशुद्धा—

समला निर्मला च सा ।

यदा सह मलेन वर्तते तदा संक्लिष्टा । यदा प्रहीणमला तदा विशुद्धा ॥

यदि समला भूत्वा निर्मला भवति, कथं विकारधर्मिणीत्वादनित्या न भवति । यस्मादस्याः—

अब्धातुकनकाकाशशुद्धिवच्छुद्धिरिष्यते ॥१७॥

आगन्तुकमलापगमान्न तु तस्याः स्वभावान्यता ।[1]

अयमपरः प्रभेदः । षोडशविधा शून्यता । अध्यात्मशून्यता, बहिर्द्धाशून्यता, अध्यात्मबहिर्द्धाशून्यता, महाशून्यता, शून्यताशून्यता, परमार्थशून्यता, संस्कृतशून्यता, असंस्कृतशून्यता, अत्यन्तशून्यता, अनवराग्रशून्यता, अनवकारशून्यता[2], प्रकृतिशून्यता, लक्षणशून्यता, सर्वधर्मशून्यता, अभावशून्यता, अभावस्वभावशून्यता । सैषा समासतो वेदितव्या ।

भोक्तृभोजन[3]तद्देहप्रतिष्ठावस्तुशून्यता ।
तच्च येन यथा दृष्टं यदर्थं तस्य शून्यता ॥१८॥

तत्र भोक्तृशून्यता आध्यात्मिकान्यायतनान्यारभ्य । भोजनशून्यता बाह्यानि । तद्देहस्तयोर्भोक्तृभोजनयोर्यदधिष्ठानं शरीरं तस्य शून्यताध्यात्मबहिर्द्धाशून्यतेत्युच्यते । प्रतिष्ठावस्तु भाजनलोकस्तस्य विस्तीर्णत्वाच्छून्यता महाशून्यतेत्युच्यते । तच्चाध्यात्मिकायतनादि येन शून्यं दृष्टं शून्यताज्ञानेन तस्य शून्यताशून्यता । यथा च दृष्टं परमार्थाकारेण तस्य शून्यता परमार्थशून्यता । यदर्थं च बोधिसत्त्वः प्रपद्यते तस्य च शून्यता ॥

---

1. Here Ms. has the following passage which appears irrelevant सर्वधर्मशून्यता स्वभावशून्यता अभावस्वभावशून्यता च सैषा समासतो वेदितव्या । भोक्तृभोजनतद्देहप्रतिष्ठावस्तु[5a]त्वं भवति । The scribe perhaps inserted the passage, which occurs a few lines ahead, by inadvertence.

2. अनवकारशून्यता is written in the margin.

3. Ms. adds व after न ।

किमर्थं च प्र[प]द्यते—

शुभद्वयस्य प्राप्त्यर्थं

कुशलस्य संस्कृतस्यासंस्कृतस्य च ॥

सदा सत्त्वहिताय च ।

अत्यन्तसत्त्वहितार्थम् ॥

¹संसारात्यजनार्थं च

अनवराग्रस्य हि संसार[5b]स्य शून्यतामपश्यन् खिन्नः संसारं परित्यजेत् ॥

कुशलस्याक्षयाय च ॥१९॥

निरुपधिशेषनिर्वाणेऽपि यन्नावकिरति नोत्सृजति तस्य शून्यतानवकारशून्यतेत्युच्यते ॥

गोत्रस्य च विशुद्ध्यर्थं

गोत्रं हि प्रकृतिः स्वाभाविकत्वात् ॥

लक्षणव्यञ्जनाप्तये ।

महापुरुषलक्षणानां सानुव्यञ्जनानां प्राप्तये ॥

शुद्धये बु[द्ध]धर्माणां बोधिसत्त्वः प्रपद्यते ॥२०॥

बलवैशारद्यावेणिकादीनाम् । एवं तावच्चतुर्दशानां शून्यतानां व्यवस्थानं वेदितव्यम् ॥

का पुनरत्र शून्यता—

---

१. Ms. adds र after सा ।

पुद्गलस्याथ धर्माणामभावः शून्यतात्र हि ।
तदभावस्य सद्भावस्तस्मिन् सा शून्यतापरा ॥२१॥

पुद्गलधर्माभावश्च शून्यता । तदभा[1]वस्य च सद्भावः । तस्मिन् यथोक्ते भोक्त्रादौ नान्या शून्यतेति शून्यतालक्षणख्यापनार्थं द्विवि[2]धामन्ते शून्यतां व्यवस्थापयति— अभावशून्यतामभावस्वभावशून्यतां च, पुद्गलधर्मसमारोपस्य तच्छून्यतापवादस्य च परिहारार्थं यथाक्रमम् । एवं शून्यतायाः प्रभेदो विज्ञेयः ॥

कथं साधनं विज्ञेयम्—

संक्लिष्टा चेद्भवेन्नासौ मुक्ताः स्युः सर्वदेहिनः ।
विशुद्धा चेद्भवेन्नासौ व्यायासो निष्फलो भवेत् ॥२२॥

यदि धर्माणां शून्यता आगन्तुकैरुपक्लेशैरनुत्पन्नेऽपि प्रतिपक्षे न संक्लिष्टा भवेत्, संक्लेशाभावादयत्नत एव मुक्ताः सर्वसत्त्वा भवेयुः । अथोत्पन्नेऽपि प्रतिपक्षे न शुद्धा भवेत्, मोक्षार्थमारम्भो निष्फलो भवेत् ॥

एवं च कृत्वा—

[6a] **न क्लिष्टा नापि चाक्लिष्टा शुद्धाशुद्धा न चैव सा ।**

कथं न क्लिष्टा नापि चाशुद्धा, प्रकृत्यैव—

प्रभास्वरत्वाच्चित्तस्य

कथं नाक्लिष्टा न शुद्धा—

क्लेशस्यागन्तुकत्वतः ॥२३॥

एवं शून्यताया उद्दिष्टः प्रभेदः साधितो भवति ॥

४. शून्यतापिण्डार्थः

तत्र शून्यतायाः पिण्डार्थो लक्षणतो व्यवस्थानतश्च वेदितव्यः । तत्र लक्षणतः, अभावलक्षणतो भावलक्षणतश्च । भावलक्षणं पुनर्भावा[भा]वविनिर्मुक्तलक्षणतश्च

---

१. Ms. तद्भा for तदभा । २. Ms. द्वि for वि ।

तत्त्वान्यत्वविनिर्मुक्तलक्षणतश्च। व्यवस्थानं पुनः पर्यायादिव्यवस्थानतो वेदितव्यम्। तत्रतया चतुष्प्रकारदेशनया शून्यतायाः स्वलक्षणं कर्मलक्षणं संक्लेशव्यवदानलक्षणं युक्तिलक्षणं चोद्भावितं भवति—

विकल्पत्रासकौसीद्यविचिकित्सोपशान्तये ॥

॥ मध्यान्तविभागभाष्ये[१] लक्षणपरिच्छेदः प्रथमः ॥

---

१. भाष्ये is in the margin of the Ms.

आवरणपरिच्छेदो द्वितीयः

१. व्याप्याद्यावरणम्

आवरणमधिकृत्याह—

व्यापिप्रादेशिकोद्रिक्तं समादानविवर्जनम् ।
द्वयावरणमाख्यातम्

तद् व्यापि क्लेशज्ञेयावरणं बोधिसत्त्वगोत्रकाणां साकल्यात् । प्रादेशिकं क्लेशावरणं श्रावकादिगोत्रकाणाम् । उद्रिक्तं तेषामेव रागादिचरितानाम् । समं समभागचरितानाम् । संसारादानत्यागावरणं बोधिसत्त्वगोत्रकाणामप्रतिष्ठित-निर्वाणावरणादित्ये[त]द्यथायोगमुभयेषा[6b]मावर[ण]माख्यातं बोधिसत्त्वगोत्रकाणां श्रावकादिगोत्रकाणां च ॥

२. प्रयोगावरणम्

पुनर्—

नवधा क्लेशलक्षणम् ॥१॥

संयोजनान्यावरणम्

नव संयोजनानि क्लेशावरणम् ॥

कस्यैतान्यावरणम्—

उद्वेगसमुपेक्षयोः ।

तत्त्वदृष्टेश्च

अनुनयसंयोजनं संवेगस्यावरणम् । प्रतिघसंयोजनमुपेक्षायाः । तेन हि प्रति-कूलमपि प्रतिघवस्तूपेक्षितुं न शक्नोति । शेषाणि तत्त्वदर्शनस्यावरणम् ॥

कथं कृत्वा ? तानि हि यथाक्रमम्—

सत्कायदृष्टेस्तद्वस्तुनोऽपि च ॥२॥

निरोधमार्गरत्नेषु लाभसत्कार एव च ।
संलेखस्य परिज्ञाने

संयोजनान्यवरणं भवति । मान[1]संयोजनं हि सत्कायदृष्टिपरिज्ञाने भवत्यावरणम्, अभिसमयकाले सान्तरव्यन्तरास्मिमानसमु[2]दाचारवशेन तदप्रहाणात् । अविद्यासंयोजनं सत्कायदृष्टिवस्तुपरिज्ञाने, तेनोपादानस्कन्धापरिज्ञानात् । दृष्टिसंयोजनं निरोधसत्यपरिज्ञाने, सत्कायान्तग्राहदृष्टि[भ्यां त]दुत्त्रासात् मिथ्यादृष्ट्या चापवादात् । परामर्शसंयोजनं मार्गसत्यपरिज्ञाने, अन्यथाग्रशुद्धिपरामर्शनात् । विचिकित्सासंयोजनं रत्नत्रयपरिज्ञाने, तद्गुणानभिश्रद्धानात् । ईर्ष्यासंयोजनं लाभस[7a]त्कारपरिज्ञाने तद्दोषादर्शनात् । मात्सर्यसंयोजनं संले[3]खपरिज्ञाने परिष्काराध्यवसानात् ॥

३. हेत्वावरणम्

शुभादौ दशधापरम्[4] ॥३॥

अपरं पुन[रा]वरणं दशविधे शुभादौ वेदितव्यम् । किं तदावरणम्, के च शुभादयः —

अप्रयोगोऽनायतनेऽयोगविहितश्च यः ।
नोत्पत्तिरमनस्कारः सम्भारस्याप्रपूर्णता ॥४॥

गोत्रमित्रस्य वैधुर्यं चित्तस्य परिखेदिता ।
प्रतिपत्तेश्च वैधुर्यं कुदुष्टजनवासता ॥५॥

दौष्ठुल्यमवशिष्टत्वं त्रयात्प्रज्ञाविपक्वता ।
प्रकृत्या चैव दौष्ठुल्यं कौसीद्यं च प्रमादिता ॥६॥

---

१. Ms. ना । २. Ms. मू । ३. Ms. ल । ४. Ms. दशधातुऽपरम् for दशधाऽपरम् ।

सक्तिर्भवे च भोगे च लीनचित्तत्वमेव च ।
अश्रद्धानधिमुक्तिश्च यथारुतविचारणम् ॥७॥
सद्धर्मेऽगौरवं लाभे गुरुताकृपता तथा ।
श्रुतव्यसनमल्पत्वं समाध्यपरिकर्मिता ॥८॥

एतदावरणम् ॥

के शुभादयः-

शुभं बोधिः समादानं धीमत्ताभ्रान्त्यनावृती ।
नत्यत्रासा[1]मत्सरित्वं वशित्वं च शुभादयः ॥९॥

एषां शुभादीनां कस्य कत्यावरणानि ज्ञेयानीत्याह—

त्रीणि त्रीणि च एतेषां ज्ञेयान्यावरणानि हि ।

कुशलस्य त्रीण्यावरणानि—अप्रयो[गो]ऽनायतनप्रयोगोऽयोनिशः प्रयोगश्च । बोधेस्त्रीणि कुशलस्यानुत्पत्तिर[7b]मनसिकरणम् अपरिपूर्णसम्भारता च । समादानं बोधिचित्तोत्पादः । तस्य त्रीणि—गोत्रवैधुर्यं कल्याणमित्रवैधुर्यं परिखेदचित्तता च । धीमत्त्वं बोधिसत्त्वता । तस्याः प्रज्ञाने त्रीण्यावरणानि—प्रतिपत्तिवैधुर्यं कुजनवासो दुष्टजनवासश्च । तत्र कुजनो मूर्खजनः, दुष्टजनः प्रतिहतः । अभ्रान्तेस्त्रीणि—विपर्यास-दौष्ठुल्यं क्लेशाद्यावरणत्रयादन्यतमावशिष्टता विमुक्तिपरिपाचिन्याः प्रज्ञाया अपरि-पक्वता च । आवरणप्रहाणमनावरणम् । तस्य त्रीणि—सहजदौष्ठुल्यं कौसीद्यं प्रमादश्च । परिणतेस्त्रीणि यैरन्यत्र चित्तं परिणमयति नानुत्तरस्यां सम्यक्संबोधौ—भवसक्तिर्भोगसक्तिर्लीनचित्तता च । अत्रासस्य त्रीणि— असम्भावना पुद्गलेऽ[न]धि-मुक्तिर्धर्मे यथारुतविचारणार्थे । अमात्सर्यस्य त्रीणि—सद्धर्मेऽगौरवं, लाभसत्कारपूजायां गौरवम्, सत्त्वेष्वकारुण्यं च । वशित्वस्य त्रीणि, यैर्विभुत्वं न लभते—श्रुतव्यसनं धर्म-व्य[सन]संवर्तनीयकर्मप्रसवनात्, अल्पश्रुत्वं, समाधेरपरिकर्मितत्वं च ॥

तत्पुनरेतदावरणं शुभादौ यत्रार्थे दश कारणानि तदर्थाधिकारेण वेदितव्यम् । दश[8a]कारणानि — उत्पत्तिकारणं तद्यथा चक्षुरादयश्चक्षुर्विज्ञानस्य । स्थितिकारणं

१. Ms. सो ।

तद्यथा चत्वार आहाराः सत्त्वानाम्। धृतिकारणं यद्यस्याधारभूतं तद्यथा भाजनलोकः सत्त्वलोकस्य। अभिव्यक्तिकारणं तद्यथा आलोको रूपस्य। विकारकारणं तद्यथा अग्न्यादयः पाक्यादीनाम्। विश्लेषकारणं तद्यथा दात्रादयश्छेद्यादीनाम्। परिणतिकारणं तद्यथा सुवर्णकारादयः सुवर्णादीनां कटकादिभावेन परिणतौ। संप्रत्ययकारणं तद्यथा धूमादयोऽग्न्यादीनाम्। संप्रत्यायनकारणं[1] तद्यथा हेतुः प्रतिज्ञायाः। प्राप्तिकारणं तद्यथा मार्गादयो निर्वाणादीनाम्। एवमुत्पत्त्यावरणं शुभे द्रष्टव्यं तस्योत्पादनीयत्वात्। स्थित्यावरणं बोधौ तस्या अकोप्यत्वात्। धृत्यावरणं समादाने बोधिचित्तस्याधारभूतत्वात्। अभिव्यक्त्यावरणं धीमत्त्वे तस्य प्रकाशनीयत्वात्। विकारावरणमभ्रान्तौ [त]स्या भ्रान्तिपरिवृत्तित्वेन विकारत्वात्। विश्लेषावर[ण]मनावरणे तस्यावरणविसंयोगत्वात्। परिणत्यावरणं नतौ तस्या[2] बोधौ चित्तपरिणतिलक्षणत्वात्। संप्रत्ययावरणमत्रासेऽसंप्रत्ययेन त्रसनात्। संप्रत्यायनावरणममत्सरित्वे धर्मामत्सरित्वेन परसं-[8b]प्रत्यायनात्। प्राप्त्यावरणं वशित्वे तस्य विभुत्वप्राप्तिलक्षणत्वात्॥

कारणं दशधोत्पत्तौ स्थितौ धृत्यां प्रकाशने।
विकारविश्लेषनतिप्रत्ययप्रापणास्विषु॥
चक्षुराहारभूदीपवह्नयादिस्तदुदाहृतिः।
दात्रशिल्पज्ञताधूमहेतुमार्गादयोऽपरे[3]॥

बोधिं प्राप्तुकामेनादित एव तावत् कुशलमूलमुत्पादयितव्यम्। ततः कुशलमूलबलाधानेन बोधिः प्राप्तव्या। तस्याः पुनः कुशलमूलोत्पत्तेर्बोधिचित्तं प्रतिष्ठा। तस्य बोधिचित्तस्य बोधिसत्त्व आश्रयः। तेन पुनरु[4]त्पादितबोधिचित्तेन कुशलमूलब[5]लाधानं प्राप्तेन बोधिसत्त्वेन विपर्यासं प्रहाय अविपर्यास उत्पादयितव्यः। ततो दर्शनमार्गे अविपर्यस्ते भावनामार्गे सर्वावरणानि प्रहातव्यानि। प्रहीणावरणे[6]न पुनस्त्रीणि[6] कुशलमूलानि अनुत्तरायां सम्यक्सम्बोधौ परिणामयितव्यानि। ततः परिणामनाबलाधानेन गम्भीरोदारधर्मदेशनासु नोत्त्रसितव्यम्। तथानु[7]त्त्रस्तेन शा[7]सनधर्मेषु गुणदर्शिना परेषां ते धर्मा विस्तरेण संप्रकाशयितव्याः। ततः स बोधिसत्त्व एवं

१. Ms. संप्रत्ययानकारणं। २. Ms. drops तस्याः। ३. Y. मताः। ४. Ms. has ः for रु। ५. ब illegible in Ms. ६....६. Ms. illegible। ७....७ Ms. completely rubbed out.

विविधगुणबलाधानप्राप्तः क्षिप्रमनुत्तरां सम्यक्संबोधिमनुप्राप्तुं धर्मा[1]मत्सरित्वेन[1] वशितामनुप्राप्नोती[9a]त्येषोऽनुक्रमः शुभादीनाम् ॥

४. तत्त्वप्रवेशाद्यावरणम्

पक्ष्यपारमिताभूमिष्वन्यदावरणं पुनः ॥१०॥

बोधिपक्ष्येषु तावत्—

वस्त्वकौशलकौसीद्यं समाधेर्द्वयहीनता ।
अरोपणाथ दौर्बल्यं दृष्टिदौष्ठुल्यदुष्टता ॥११॥

स्मृत्युपस्थानेषु वस्त्वकौशलमावरणम् । सम्यक्प्रहाणेषु कौसीद्यम् । ऋद्धिपादेषु समाधेर्द्वयहीनता अपारिपूर्या छन्दवीर्यचित्तमीमांसानामन्यतमवैकल्यात्, भावनया च प्रहाणसंस्कार[2]वैकल्यात् । इन्द्रियेषु मोक्षभागीयानामरोपणम् । बलेषु ते[3]षामेवेन्द्रियाणां दौर्बल्यं विपक्षव्यवकिरणात् । बोध्यङ्गेषु दृष्टिदोषस्तेषां दर्शनमार्गप्रभा[4]वितत्वात् । मार्गाङ्गेषु दौष्ठुल्यदोषस्तेषां भा[5]वनामार्गप्रभा[6]वितत्वात् ॥

पार[7]मितास्वावरणम्—

ऐश्वर्यस्याथ सुगतेः सत्त्वात्यागस्य चावृतिः ।
हानिवृद्ध्योश्च दोषाणां गुणानामवतारणे ॥१२॥

विमोचनेऽक्षयत्वे च नैरन्तर्ये शुभस्य च ।
नियतीकरणे धर्मसंभोगपरिपाचने ॥१३॥

अत्र दशानां पारमितानां यस्याः पारमिताया यत्फलं तदावरणेन तस्या आवरणमुद्भावितं भवति । तत्र दानपारमिताया ऐश्वर्याधिपत्यावरणमावरणम् । शीलपारमिताया सुगत्यावरणम् । क्षान्तिपारमितायाः सत्त्वा[9b]परित्यागावरणम् ।

१....१. अमत्सरित्वेन completely rubbed out २. Ms. रा । ३. Ms. त । ४. Ms. भ । ५. Ms. भ । ६. Ms. भ । ७. Ms. रि ।

वीर्यपारमिताया दोषगुणहानिवृद्धयावरणम्। ध्यानपारमिताया विनेयावतारणावरणम्। प्रज्ञापारमिताया विमोचनावरणम्। उपायकौशल्यपारमिताया दानाद्यक्षयत्वावरणम्, बोधिपरिणामनया तदक्षयत्वात्। प्रणिधानपारमितायाः सर्वजन्मसु कुशलनैरन्तर्य-प्रवृत्त्यावरणम्, प्रणिधानवशेन तदनुकूलोपपत्तिपरिग्रहात्। बलपारमितायाः तस्यैव कुशलस्य नियतीकरणावरणं प्रतिसंख्यानभावनाबलाभ्यां विबन्धानभिभवात्। ज्ञान-पारमिताया आत्मपरयोर्धर्मसम्भोगपरिपाचनावरणमावरणमयथावत् श्रुतार्थावबोधात्॥

भूमिषु पुनर्यथाक्रमम्—

सर्वत्रगार्थे अग्रार्थे निष्यन्दाग्रार्थ एव च।
निष्परिग्रहतार्थे वा सन्तानाभेद एव वा॥१४॥

निःसंक्लेशविशुद्ध्यर्थे अनानात्वार्थ एव च।
अहीनानधिकार्थे च चतुर्द्धा वशिताश्रये॥१५॥

धर्मधातावविद्येयं ह्यक्लिष्टा दशधावृतिः।
दशभूमिविपक्षेण प्रतिपक्षास्तु भूमयः॥१६॥

धर्मधातौ दशविधे सर्वत्रगाद्यर्थे यदक्लिष्टमज्ञानं तद्दशसु बोधिभूमिष्वावरणं यथाक्रमं तद्विपक्षत्वात्। यदुत सर्वत्रगार्थे प्रथमया हि भूम्या धर्मधातोः सर्वत्रगार्थं प्रतिविध्यति येनात्मपर[स]मतां प्रतिलभते। [10a] द्वितीयययाग्रार्थं येनास्यैवं भवति—तस्मात्तर्ह्यस्माभिः समानेऽभिनिर्हा[1]रे सर्वाकारपरिशोधनाभिनिर्हार एव योगः करणीय इति। तृतीयया तन्निष्यन्दाग्रार्थम्, येन धर्मधातुनिष्यन्दस्य श्रुतस्याग्रतां विदित्वा तदर्थं त्रिसाहस्रमहासाहस्रप्रमाणायामप्यग्निखदायामात्मानं प्रक्षिपेत्। चतुर्थ्या निष्परिग्रह-तार्थम्, तथा हि धर्मतृष्णापि व्यावर्तते। पञ्चम्या सन्तानाभेदार्थं दशभिश्चित्ताशय-विशुद्धिसमताभिः। षष्ठ्या निःसंक्लेशविशुद्ध्य[2]र्थं प्रतीत्यसमुत्पादे नास्ति स कश्चिद्धर्मो यः संक्लिश्यते वा विशुध्यते वेति प्रतिवेधात्। सप्तम्या अनानात्वार्थं निर्निमित्ततया सूत्रादिधर्मनिमित्तनानात्वासमुदाचारात्। अष्टम्या अहीनानधिकार्थमनुत्पत्तिकधर्मक्षान्ति-

---

१. Ms. विह for निर्हा। २. Ms. द्दा।

लाभात् संक्लेशे व्यवदाने वा कस्यचिद् धर्मस्य हानिवृद्ध्यदर्शनात् । चतुर्धा वशिता—निर्विकल्पवशिता क्षेत्रपरिशुद्धिवशिता ज्ञानवशिता कर्मवशिता च । तत्र प्रथमद्वितीय वशिताश्रयत्वं धर्मधातावष्टम्यैव भूम्या प्रतिविध्यति । ज्ञानवशिताश्रयत्वं नवम्यां प्रतिसंविल्लाभात् । कर्मवशिताश्रयत्वं दशम्यां यथेच्छं निर्माणैः सत्त्वार्थकर[10b]-णत्वम्[१] ।

५. संग्रहावरणम्

समासेन पुनः—

क्लेशावरणमाख्यातं ज्ञेयावरणमेव च ।
सर्वाण्यावरणानीह यत्क्षयान्मुक्तिरिष्यते ॥१७॥

अस्य हि द्विविधस्यावरणस्य क्षयात् सर्वावरणेभ्यो मुक्तिरिष्यते ॥

६. आवरणपिण्डार्थः

आव[र]णानां पिण्डार्थः । महदावरणं यद्व्यापि । प्रतन्वावरणं यत् प्रादेशिकम् । प्रयोगावरणं यदुद्रिक्तम् । प्राप्त्यावरणं यत्समम् । प्राप्तिविशेषावरणं यदादानविवर्जने । सम्यक्प्रयोगावरणं यन्नवधा क्लेशावरणम् । हेत्वावरणं यच्छुभादौ दशविधहेतुत्वाधिकारात् । तत्त्वप्रवेशावरणं यद्बोधिपक्ष्येषु । शुभानुत्तर्यावरणं यत् पारमितासु । तद्विशेषगत्यावरणं यद्भूमिषु । संग्रहावरणं यत् समासतो द्विविधम् ॥

॥ मध्यान्तविभागे आवरणपरिच्छेदो द्वितीयः ॥

१. Y. णात् ।

तत्त्वपरिच्छेदस्तृतीयः

१. दशविधं तत्त्वम्

तत्त्वमधिकृत्याह—

मूललक्षणतत्त्वाभ्याममविपर्यासलक्षणम्[1] ।
फलहेतुमयं तत्त्वं सूक्ष्मौदारिकमेव च ॥१॥

प्रसिद्धं शुद्धिविषयं संग्रहो[2] भेदलक्षणम् ।
कौशल्यतत्त्वं दशधा ह्यात्मदृष्टिविपक्षतः ॥२॥

इत्येतद्दशविधं तत्त्वं यदुत मूलतत्त्वं लक्षणतत्त्वमविपर्यासतत्त्वं फलहेतुतत्त्वमौदारिक-सूक्ष्मतत्त्वं प्रसिद्धतत्त्वं विशुद्धिगोचरतत्त्वं संग्रहतत्त्वं प्रभेदतत्त्वं कौ[11a]शल्यतत्त्वं च। तत्पुनर्दशविधं दशविधात्मग्राहप्रतिपक्षेण वेदि[त]व्यम्। तद्यथा स्कन्धकौशल्यं धातुकौशल्यमायतनकौशल्यं प्रतीत्यसमुत्पादकौशल्यं स्थानास्थानकौशल्यमिन्द्रियकौशल्यं ग्रन्थकौशल्यं सत्यकौशल्यं यानकौशल्यं संस्कृतकौशल्यं च ॥

१ (१). मूलतत्त्वम्

तत्र मूलतत्त्वम्—

स्वभा[व]स्त्रिविधः

परिकल्पितः परतन्त्रः परिनिष्पन्नश्च, तत्रान्यतत्त्वव्यवस्थापनात् ॥

किमत्र स्वभावत्रये तत्त्वमिष्यते—

असच्च नित्यं सच्चाप्यतत्त्वतः ।
सदसत्तत्त्वतश्चेति स्वभावत्रयमिष्यते ॥३॥

---

१. Ms. मूललक्षणतत्त्वंअविपर्यासलक्षणं। २. Ms. संग्राह्य।

परिकल्पितलक्षणं नित्यमसदित्येतत् परिकल्पितस्वभावे तत्त्वमविपरीतत्वात्। परतन्त्रलक्षणं सच न च तत्त्वतो [1]भ्रान्तत्वादित्येतत्परतन्त्रस्वभावे तत्त्वम्। परिनिष्पन्नलक्षणं सदसत्तत्त्वतश्चेत्येतत् परिनिष्पन्नस्वभावे तत्त्वम् ॥

१ (२). लक्षणतत्त्वम्

लक्षणतत्त्वं कतमत्—

समारोपापवादस्य धर्मपुद्गलयोरिह ।
ग्राह्यग्राहकयोश्चापि भावाभावे च दर्शनम् ॥४॥

यज्ज्ञानान्न प्रवर्त्तेत तद्धि तत्त्वस्य लक्षणम् ।

पुद्गलधर्मयोः समारोपापवाददर्शनं यस्य ज्ञानान्न प्रवर्तते तत्परिकल्पितस्वभावे तत्त्वलक्षणम् । ग्राह्यग्राहकयोः समारोपापवाददर्शनं यस्य ज्ञानान्न प्रवर्तते तत्परत[11b]न्त्रस्वभावे तत्त्वलक्षणम्। भावाभावे समारोपापवाददर्शनं यस्य ज्ञानान्न प्रवर्तते तत्परिनिष्पन्नस्वभावे तत्त्वलक्षणम् । एतन्मूलतत्त्वे लक्षणमविपरीतं लक्षणतत्त्वमित्युच्यते ॥

१ (३). अविपर्यासतत्त्वम्

अविपर्यासतत्त्वं नित्यादिविपर्यासप्रतिपक्षेणानित्यदुःखशून्यानात्मता । मूलतत्त्वे यथाक्रमं कथं च तत्रानित्यतादिता वेदितव्या—

असदर्थो ह्यनित्यार्थ उत्पादव्ययलक्षणः ॥५॥

समलामलभावेन मूलतत्त्वे यथाक्रमम् ।

त्रयो हि स्वभावा मूलतत्त्वम्। तेषु यथाक्रममसदर्थो ह्यनित्यत्वार्थ उत्पादव्ययार्थः समला[मल]भावश्च ॥

दुःखमादानलक्ष्माख्यं सम्बन्धेनापरं मतम् ॥६॥

---

१. Y. भ्रान्तिमात्रत्वात् ।

मूलतत्त्वे यथाक्रमं दुःखमुपादानतः पुद्गलधर्माभिनिवेशोपादानात्, लक्षणतस्त्रिदुःखतालक्षणत्वात्, संबन्धतश्च दुःखसम्बन्धात्, तत्रैव मूलतत्त्वे यथाक्रमं वेदितव्यम्॥

अभावश्चाप्यतद्भावः प्रकृतिः शून्यता मता ।

परिकल्पितलक्षणं न केनचित्प्रकारेणास्तीत्यभाव एवास्य शून्यता। परतन्त्रलक्षणं तथा नास्ति यथा परिकल्प्यते, न तु सर्वथा नास्तीति तस्यातद्भावः शून्यता। परिनिष्पन्नलक्षणं शून्यतास्वभावमेवेति प्रकृतिरेवास्य शून्यता॥

अलक्षणं च नैरात्म्यं तद्विलक्षणमे[12a]व च ॥७॥

स्वलक्षणं च निर्दिष्टं

परिकल्पितस्य स्वभावस्य लक्षणमेव नास्तीत्यलक्षणमेवास्य नैरात्म्यम्। परतन्त्रस्यास्ति लक्षणं न तु यथा परिकल्प्यत इति [त]द्विलक्षणमस्य लक्षणं नैरात्म्यम्। परिनिष्पन्नस्तु स्वभावो नैरात्म्यमेवेति प्रकृतिरेवास्य नैरात्म्यमिति। त्रिविधे मूलतत्त्वे त्रिविधानित्यता परिदीपिता—असदर्थानित्यता उत्पादभङ्गानित्यता समलनिर्मलानित्यता च। त्रिविधा दुःखता—उपादानदुःखता लक्षणदुःखता सम्बन्धदुःखता च। त्रिविधा शून्यता—अभावशून्यता अतद्भावशून्यता [प्रकृतिशून्यता] च। त्रिविधं नैरात्म्यम्—अलक्षणनैरात्म्यं विलक्षणनैरात्म्यं स्वलक्षणनैरात्म्यं च॥

१ (४). फलहेतुतत्त्वम्

फलहेतुमयं तत्त्वं तत्रैव मूलतत्त्वे दुःखसमुदयनिरोधमार्गसत्यत्वम्। कथं त्रिविधं मूलतत्त्वं दुःखादि[1]सत्यम्[2], यतस्तदनित्यादिलक्षणम्—

दुःखसत्यमतो मतम् ।

त्रिविधेन समुदयार्थेन समुदयसत्यम्। त्रिविधः समुदयार्थः—

वासनाथ समुत्थानमविसंयोग एव च ॥८॥

---

१. Ms. र्ति for दि। २. Ms. has त्वं after त्यम्।

वासनासमुदयः परिकल्पितस्वभावाभिनिवेशवासना। समुत्थानसमुदयः कर्मक्लेशाः। अविसंयोगसमुदयः तथताया आवरणाविसंयोगः॥

त्रिविधेन निरोधेन निरोधसत्यम्। त्रिवि[12b]धो निरोधः—

स्वभावद्वयनोत्पत्तिर्मलशान्तिद्वयं मतम्।

स्वभावानुत्पत्ति[ग्राह्य]ग्राहकयोरनुत्पत्तिर्मलशान्तिद्वयं च प्रतिसंख्यानिरोधस्तथताख्यः। इत्येष त्रिविधो निरोधो यदुत स्वभावनिरोधो द्वयनिरोधः प्रकृतिनिरोधश्च॥

मार्गसत्यं त्रिविधे मूलतत्त्वे कथं व्यवस्थाप्यते—

परिज्ञायां प्रहाणे च प्राप्तिसाक्षात्कृतावपि॥९॥

मार्गसत्यं समाख्यातं

परिकल्पितस्य परिज्ञाने, परतन्त्रस्य परिज्ञाने प्रहाणे च, परिनिष्पन्नस्य परिज्ञाने प्राप्तिसाक्षात्करणे च। एवमत्र परिज्ञानप्रहाणसाक्षात्क्रिया य[1]या त्रिवि[धं] मार्गसत्यव्यवस्थानं वेदितव्यम्॥

१ (५). औदारिकसूक्ष्मतत्त्वम्

औदारिकसूक्ष्मतत्त्वं पुनः संवृतिपरमार्थसत्यम्। तन्मूलतत्त्वे कथं वेदितव्यम्—

प्रज्ञप्तिप्रतिपत्तितः।

तथोद्भावनयोदारं

त्रिविधा हि संवृतिः— प्रज्ञप्तिसंवृतिः प्रतिपत्तिसंवृतिरुद्भावनासंवृतिश्च। तया संवृतिसत्यत्वं मूलतत्त्वे यथाक्रमं वेदितव्यम्॥

परमार्थं तु एकतः॥१०॥

---

१. Ms. या।

परमार्थसत्यमेकस्मात्परिनिष्पन्नादेव स्वभावाद्वेदितव्यम् ॥

स पुनः कथं परमार्थः —

अर्थप्राप्तिप्रपत्त्या हि परमार्थस्त्रिधा मतः ।

अर्थपरमार्थस्तथता परमस्य ज्ञानस्यार्थ इति कृत्वा । प्राप्तिपरमार्थो निर्वाणं परमोऽर्थ इति कृत्वा । प्रतिपत्तिपरमार्थो [13a] मार्गः परमोऽस्यार्थ इति कृत्वा ॥

कथमसंस्कृतं च संस्कृतं च परिनिष्पन्नः स्वभाव उच्यते—

निर्विकाराविपर्यासपरिनिष्पत्तितो द्वयम् ॥११॥

असंस्कृतमविकारपरिनिष्पत्त्या परिनिष्पन्नम् । संस्कृतं मार्गसत्यसंगृहीतमविपर्यासपरिनिष्पत्त्या पुनर्ज्ञेयवस्तुन्यविपर्यासात् ॥

१ (६). प्रसिद्धतत्त्वम्

प्रसिद्धतत्त्वं मूलतत्त्वे कथं व्यवस्थाप्यते ? द्विविधं हि प्रसिद्धतत्त्वं-लोकप्रसिद्धं युक्तिप्रसिद्धं च। तत्र—

लोकप्रसिद्धमेकस्मात्

परिकल्पितस्वभावात् । यस्मिन् वस्तुनि संकेतसंस्तवानुप्रविष्टया बुद्धया सर्वेषां लौकिकानां दर्शनतुल्यता भवति पृथिव्येवेयं नाग्नीरूपमेवेदं न शब्द इत्येवमादि ॥

त्रयाद्युक्तिप्रसिद्धकम् ।

यत् सतां युक्तार्थपण्डितानां तार्किकाणां प्रमाणत्रयं निश्रित्योपपत्तिसाधनयुक्त्या प्रसिद्धं वस्तु ॥

१ (७). विशुद्धिगोचरतत्त्वम्

विशुद्धिगोचरतत्त्वं द्विविधं क्लेशावरणविशुद्धिज्ञानगोचरं ज्ञेयावरणविशुद्धिज्ञानगोचरं च । तदेतत्—

विशुद्धिगोचरं द्वेधा एकस्मादेव कीर्तितम् ॥१२॥

परिनिष्पन्नादेव स्वभावात्। न ह्यन्यस्वभावो विशुद्धिज्ञानद्वयगोचरो भवति ॥

१ (८) संग्रहतत्त्वम्

कथं त्रिविधे मूलतत्त्वे संग्रहतत्त्वं वेदितव्यम्—

निमित्तस्य विकल्पस्य नाम्नश्च द्वयसंग्रहः।

यथायोगं पञ्चवस्तून्यारभ्य। निमित्तविकल्पयोः परतन्त्रेण सं[13b]ग्रहः। नाम्नः परिकल्पितेन ॥

सम्यग्ज्ञानसतत्त्वस्य एकेनैव च संग्रहः ॥१३॥

तथतासम्यग्ज्ञानयोः परिनिष्पन्नेन स्वभावेन संग्रहः ॥

१ (९). प्रभेदतत्त्वम्

प्रभेदतत्त्वं मूलतत्त्वे कथं वेदितव्यम्? सप्तविधं प्रभेदतत्त्वम्— प्रवृत्तितत्त्वं लक्षणतत्त्वं विज्ञप्तितत्त्वं सन्निवेशतत्त्वं मिथ्याप्रतिपत्तितत्त्वं विशुद्धितत्त्वं सम्यक्प्रतिपत्तितत्त्वं च। तत्र प्रवृत्तितत्त्वादि त्रिविधं अनवराग्रो जातिसंसारस्तथता चित्तसंक्लेशात्सत्त्वाः संक्लिश्यन्त इति सर्वं दुःखादिमत्त्वं च। यथासंख्ययैव च सन्धिनिर्मोचन सूत्रे सप्तविधा तथता निर्दिष्टा। तत्र—

प्रवृत्तितत्त्वं द्विविधं

मूलतत्त्वं वेदितव्यम्। परिकल्पितपरतन्त्रलक्षणम्। यथा प्रवृत्तितत्त्वं तथा—

सन्निवेशः कुपन्नता।

सन्निवेशमिथ्याप्रतिपत्तितत्त्वे अपि[1] द्विविधं मूलतत्त्वम्।

---

१. Ms. has four apparently irrelevant syllables after पि। They read भवेद्व।

एकं लक्षणविज्ञप्तिशुद्धिसम्यक्प्रपन्नता ॥१४॥

लक्षणतत्त्वादीनि चत्वार्येकं मूलतत्त्वं परिनिष्पन्नलक्षणम् ॥

१ (१०). कौशल्यतत्त्वम्

कौशल्यतत्त्वं दर्शनप्रतिपक्षेणेत्युक्तम् । कथमेषु स्कन्धादिषु दशविधमात्मदर्शनम्—

एकहेतुत्वभोक्तृत्वकर्तृत्ववशवर्तने ।
आधिपत्यार्थनित्यत्वे क्लेशशुद्धाश्रयेऽपि च ॥१५॥

योगित्वामुक्तमुक्तत्वे ह्यात्मदर्शनमेषु हि ।

एष दशविध आत्मसद्ग्राहः स्कन्धादिषु प्रवर्तते । यस्य प्रति[14a]पक्षेण दशविधं कौशल्यं यदुतैकत्वग्राहो हेतुत्वग्राहो भोक्तृत्वग्राहः कर्तृत्वग्राहः स्वतन्त्र[त्व]ग्राहश्च । अधिपतित्वग्राहो नित्यत्वग्राहः संक्लिष्टव्यवदानत्वग्राहो योगित्वग्राहोऽमुक्तमुक्तत्वग्राहश्च । कथमिदं दशविधं कौशल्यतत्त्वं मूलतत्त्वेऽन्तर्भवति, यतस्त्रिषु स्वभावेषु ते स्कन्धादयः अन्तर्भूताः ॥

कथमन्तर्भूताः —

परिकल्पविकल्पार्थधर्मतार्थेन तेषु ते ॥१६॥

त्रिविधं रूपम् । परिकल्पितं रूपं यो रूपस्य परिकल्पितः स्वभावः । विकल्पितं रूपं यो रूपस्य परतन्त्रः स्वभावस्तत्र हि रूपविकल्पः क्रियते । धर्मतारूपं[1] यो रूपस्य परिनिष्पन्नः स्वभावः । यथा रूपमेवं वेदनादयः स्कन्धा धात्वायतनादयश्च योज्याः । एवं त्रिषु स्वभावेषु स्कन्धादीनामन्तर्भावाद्दशविधं कौशल्यतत्त्वं मूलतत्त्व एव द्रष्टव्यम् । उक्तमिदं यथा दशविधात्मदर्शनप्रतिपक्षेण स्कन्धादिकौशल्यम् ॥

---

१. Ms. रूपयं for रूपं ।

(क) स्कन्धार्थः

स्कन्धाद्यर्थस्तु नोक्तः। स इदानीमुच्यते—

अनेकत्वाभिसंक्षेपपरिच्छेदार्थ आदितः।

आदितस्तावत् स्कन्धाः। ते त्रिविधेनार्थेन वेदितव्याः। अनेकत्वार्थेन यत्किञ्चिद्रूपमतीतानागतप्रत्युत्पन्नमिति विस्तरः। अभिसंक्षेपार्थेन तत्सर्वमैकध्यमभिसंक्षिप्येति। परिच्छेदार्थेन [14b] च रूपादिलक्षणस्य पृथक्त्वव्यवस्थानात्। राश्यर्थो हि स्कन्धा[र्थः]। एवं च लोके राश्यर्थो दृष्ट इति॥

(ख) धात्वर्थः

ग्राहकग्राह्यतद्ग्राहबीजार्थश्चापरो मतः॥१७॥

कतमोऽपरः। धातुः। तत्र ग्राहकबीजार्थश्चक्षुर्धात्वादयः। ग्राह्यबीजार्थो रूपधात्वादयः। तद्ग्राहबीजार्थश्चक्षुर्विज्ञानधात्वादयः॥

(ग) आयतनार्थः

वेदितार्थपरिच्छेदभोगाय द्वारतोऽपरम्।

किमपरम्। आयतनम्। तत्र वेदितोपभोगाय द्वारार्थेन षडाध्यात्मिकान्यायतनानि। अर्थपरिच्छेदोपभोगाय द्वारार्थेन षड् बाह्यानि॥

(घ) प्रतीत्यसमुत्पादार्थः

प्रतीत्यसमुत्पादार्थः—

पुनर्हेतुफलायासानारोपानपवादतः॥१८॥

हेतु[1]फलक्रियाणामसमारोपानपवादार्थः प्रतीत्यसमुत्पादार्थः । तत्र हेतुसमारोपः संस्कारादीनां विष[म]हेतुकल्पनात् । हेत्वपवादो निर्हेतुकत्वकल्पनात् । फलसमारोपः [सात्म]कानां संस्कारादीनामविद्यादिप्रत्ययप्रवृत्तिकल्पनात् । फलापवादो न[2] सन्त्यविद्यादिप्रत्ययाः संस्कारादय इति कल्पनात् । क्रियासमारोपोऽविद्यादीनां संस्काराद्युत्पत्तौ व्यापारकल्पनात्[3] । क्रियापवादो निःसामर्थ्यकल्पनात् । तदभावादसमारोपानपवादो वेदितव्यः ॥

(ङ) स्थानास्थानार्थः

अनिष्टेष्टविशुद्धीनां समोत्पत्त्याधिपत्ययोः ।
सम्प्राप्तिसमुदाचा[15a]रपारतन्त्र्यार्थतोऽपरम् ॥१९॥

स्थानास्थानं सप्तविधपारतन्त्र्यार्थेन वेदितव्यम् । तत्रानिष्टे पारतन्त्र्यं दुश्चरितेनानिच्छतोऽपि दुर्गतिगमनात् । इष्टे पारतन्त्र्यं सुचरितेन सुगतिगमनात् । विशुद्धौ पारतन्त्र्यं पञ्च निवरणान्यप्रहाय यावत् सप्त बोध्यङ्गान्यभावयित्वा दुःखस्यान्ताकरणात् । समोत्पत्तौ पारतन्त्र्यं द्वयोरपूर्वाचरमयोस्तथागतयोश्चक्रवर्तिनोश्चैकस्मिन् लोकधातावनुत्पादात् । आधिपत्ये पारतन्त्र्यं स्त्रियाश्चक्रवर्तित्वाद्यकरणात् । सम्प्राप्तौ पारतन्त्र्यं स्त्रियाः प्रत्येकानुत्तरबोध्यनभिसंबोधात् । समुदाचारे पारतन्त्र्यं दृष्टिसम्पन्नस्य वधाद्युपक्रमासमुदाचारात् पृथग्जनस्य च समुदाचारात् । विस्तरेण ब हु धा तु क सू त्रानुसारादनुगन्तव्यम् ॥

(च) इन्द्रियार्थः

इन्द्रियं पुनर्द्वाविंशतिविधम्—

ग्रहणस्थानसन्धानभोगशुद्धिद्वयार्थतः ।

ग्रहणार्थेन यावद् विशुद्धिद्वयार्थेन तेषु तदाधिपत्यात् । ज्ञेयादिविषयग्रहणे हि चक्षुरादीनां षण्णामाधिपत्यम् । स्थाने जीवितेन्द्रियस्य तदाधिपत्येनामरणात् । कुलसन्धाने स्त्रीपुरुषेन्द्रिययोरपत्यप्रसवाधिपत्यात् । वि[प]यभोगे वेदनेन्द्रियाणां कुशला-

---

१. Ms has apparent ङ्ग after तु । २. Ms. ना । ३. Ms. °नम्र ।

कुशलकर्मफलोपभोगात्। लौकिकविशुद्धौ श्रद्धा[15b]दीनां लोकोत्तरविशुद्धौ अनाज्ञात-माज्ञास्यामीन्द्रियादीनाम् ॥

(छ) अध्वार्थः

फलहेतूपयोगाच्च नोपयोगात्तथापरम् ॥२०॥

किमपरम्। अध्वत्रयम्। यथायोगं फलहेतूपयोगार्थेनातीतोऽध्वा फलहेत्वनुपयोगार्थेनानागतोऽध्वा हेतूपयोगफलानुपयोगार्थेन प्रत्युत्पन्नो वेदितव्यः॥

(ज) चतुःसत्यार्थः

वेदनासनिमित्तार्थतन्निमित्तप्रपत्तितः।
तच्छमप्रतिपक्षार्थयोगादपरमिष्यते ॥२१॥

किमपरम्। सत्यचतुष्टयम्। तत्र दुःखसत्यं वेदनासनिमित्तार्थेन यत्किञ्चिद्वेदितमिदमत्र दुःखस्येति कृत्वा। वेदनानिमित्तं पुनर्वेदनास्थानीया धर्मा वेदितव्याः। तन्निमित्तप्रतिपत्तितः समुदयसत्यम्। दुःखसत्यनिमित्तं या प्रतिपत्तिः। तयोः शमार्थेन निरोधसत्यम्। प्रतिपक्षार्थेन मार्गसत्यम्॥

(झ) यानत्रयार्थः

गुणदोषाविकल्पेन ज्ञानेन परतः स्वयम्।
निर्याणादपरं ज्ञेयं

यानत्रयं यथायोगम्। तत्र निर्वाणसंसारयोर्गुणदोषज्ञानेन परतः श्रुत्वा निर्याणार्थेन श्रावकयानम्। तेनैव स्वयमश्रुत्वा परतो निर्याणार्थेन प्रत्येकबुद्धयानम्। अविकल्पेन ज्ञानेन स्वयं निर्याणार्थेन महायानं वेदितव्यम्॥

(ञ) संस्कृतासंस्कृतार्थः

सप्रज्ञप्तिसहेतुकात् ॥२२॥

[16a]निमित्तात्प्रशमात्सार्थात् पश्चिमं समुदाहृतम् ॥२३॥

संस्कृतासंस्कृतम् । तत्र प्रज्ञप्तिर्नामकायादयः । हेतुर्बीजसंगृहीतमालयविज्ञानम् । निमित्तं प्रतिष्ठादेहभोगसंगृहीतं प्रवृत्तिविज्ञानसंगृहीताश्च मनउद्ग्रहविकल्पाः । एतत् सप्रज्ञप्तिसहेतुकं निमित्तं ससम्प्रयोगं संस्कृतं वेदितव्यम् । तत्र मनो यन्नित्यं मन्यनाकारम् । उद्ग्रहः पञ्चविज्ञानकायाः । विकल्पो मनोविज्ञानं तस्य विकल्पकत्वात् । असंस्कृतं पुनः प्रशमश्च निरोधः प्रशमार्थश्च । तत्र प्रशमो निरोधो मार्गश्च यच्च प्रशमो येन चेति कृत्वा । प्रशमार्थस्तथता प्रशमस्यार्थ इति कृत्वा । तथताया मार्गालम्बनत्वात् । मार्गस्य प्रशमत्वं तेन प्रशमनात् । इत्येतेनार्थेन स्कन्धादिषु ज्ञानं स्कन्धादिकौशल्यं वेदितव्यम् ॥

२. तत्त्वपिण्डार्थः

तत्त्वस्य पिण्डार्थः । समासतो द्विविधं तत्त्वम्— आदर्शतत्त्वं दृश्यतत्त्वं च । तत्रादर्शतत्त्वं मूलतत्त्वम् । तत्र शेषाणां दर्शनात् । दृश्यतत्त्वं नवधा— निरभिमानदृश्यतत्त्वमविपर्यासदृश्यतत्त्वं श्रावकयाननिर्याणदृश्यतत्त्वं महायाननिर्याणदृश्यतत्त्वमौदारिकेन परिपाचनात् सूक्ष्मेण च विमोचनात्, परवादिनिग्रहदृश्यतत्त्वं दृष्टान्तसन्निश्रयेण यु[16b]क्त्या निग्रहात्, महायानाभिद्योतनदृश्यतत्त्वं सर्वाकारज्ञेयप्रवेशदृश्यतत्त्वमवितथ[तथ]ताभिद्योत[न]दृश्यतत्त्वमात्मग्राह्वस्तुसर्वाभिसन्धिप्रवेशदृश्यतत्त्वं च ॥

॥ मध्यान्तविभागशास्त्रे तत्त्वपरिच्छेदस्तृतीयः ॥

प्रतिपक्षभावनावस्थाफलपरिच्छेदश्चतुर्थः

१. प्रतिपक्षभावना

प्रतिपक्षभावना बोधिपक्ष्यभावना। सेदानीं वक्तव्या ॥

(क) चत्वारिस्मृत्युपस्थानानि

तत्र तावदादौ—

दौष्ठुल्यात्तर्षहेतुत्वाद्वस्तुत्वादविमोहतः।
चतुःसत्यावताराय स्मृत्युपस्थानभावना ॥१॥

कायेन हि दौष्ठुल्यं प्रभाव्यते। तत्परीक्षया दुःखसत्यमवतरति, तस्य सदौष्ठुल्यसंस्कारलक्षणत्वात्। दौष्ठुल्यं हि संस्कारदुःखता, तया सर्वं सास्रवं वस्त्वार्या दुःखतः पश्यन्तीति। तृष्णाहेतुर्वेदना, तत्परीक्षया समुदयसत्यमवतरति। आत्माभिनिवेशवस्तु चित्तम्, तत्परीक्षया निरोधसत्यमवतरति, आत्मोच्छेदभयापगमात्। धर्मपरीक्षया सांक्लेशिकवैयवदानिकधर्मासम्मोहान्मार्गसत्यमवतरति। अत आदौ चतुःसत्यावताराय स्मृत्युपस्थानभावना व्यवस्थाप्यते॥

(ख) चत्वारि सम्यक्प्रहाणानि

ततः सम्यक्प्रहाणभावना। यस्मात्—

परिज्ञाते विपक्षे च प्रतिपक्षे च सर्वथा।
तदपायाय वीर्यं हि चतुर्धा संप्रवर्तते ॥२॥

स्मृत्यु[17a]पस्थानभावनया विपक्षे प्रतिपक्षे च सर्वप्रकारं परिज्ञाते विपक्षापगमाय प्रतिपक्षोपगमाय च वीर्यं चतुर्धा संप्रवर्तते। उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणायेति विस्तरः॥

(ग) चत्वार ऋद्धिपादाः

कर्मण्यता स्थितेस्तत्र सर्वार्थानां समृद्धये ।

पञ्चदोषप्रहाणाष्टसंस्कारभा[1]वनान्वया ॥३॥

तस्यां तदपायाय वीर्यभावनायां चित्तस्थितेः कर्मण्यता चत्वार ऋद्धिपादाः सर्वार्थसमृद्धि[हे]तुत्वात् । स्थितिरत्र चित्तस्थितिः समाधिर्वेदितव्यः । अतः सम्यक्प्रहाणानन्तरमृद्धिपादाः । सा पुनः कर्मण्यता पञ्चदोषप्रहाणायाष्टसंस्कारभावनान्वया वेदितव्या ॥

कतमे पञ्च दोषा इत्याह—

कौसीद्यमववादस्य संमोषो लय उद्धवः ।

असंस्कारोऽथ संस्कारः पञ्च [दो]षा इमे मताः ॥४॥

तत्र लयौद्धत्यमेको दोषः क्रियते । अनभिसंस्कारो लयौद्धत्यप्रशमनकाले दोषः । अभिसंस्कारः प्रशान्तौ ॥ एषां प्रहाणापकर्षार्थमष्टौ प्रहाणसंस्कारा व्यवस्थाप्यन्ते । चत्वारः कौसीद्यप्रहाणाय च्छन्दव्यायामश्रद्धाप्रस्रब्धयः । ते पुनर्यथाक्रमं वेदितव्याः —

आश्र[17b]योऽथाश्रितस्तस्य निमित्तं फलमेव च ।

आश्रयश्छन्दो [व्या]यामस्य । आश्रितो व्यायामः । तस्याश्रयस्य च्छन्दस्य निमित्तं श्रद्धा, सम्प्रत्यये सत्यभिलाषात् । तस्याश्रितस्य व्यायामस्य फलं प्रस्रब्धिरारब्धवीर्यस्य समाधिविशेषाधिगमात् । शेषाश्चत्वारः प्रहाणसंस्काराः स्मृतिसंप्रजन्यचेतनोपेक्षाश्चतुर्णां दोषाणां यथासंख्यं प्रतिपक्षाः । ते पुनः स्मृत्यादयो वेदितव्या यथाक्रमम्—

आलम्बने असंमोषो लयौद्धत्यानुबुद्धचना ॥५॥

तदपायाभिसंस्कारः शान्तौ प्रशठवाहिता ।

स्मृतिरालम्बनेऽसंप्रमोषः । संप्रजन्यं स्मृत्यसम्प्रमोषे सति लयौद्धत्यावबोधः । अनुबुद्धय तदपगमायाभिसंस्कारश्चेतना । तस्य लयौद्धत्यस्योपशान्तौ सत्यां प्रशठवाहिता चित्तस्योपेक्षा ॥

---

१. Ms. रामे for रभा ।

(घ) पञ्चेन्द्रियाणि

ऋद्धिपादानामनन्तरं पञ्चेन्द्रियाणि श्रद्धादीनि। तेषां कथं व्यवस्थानम्—

रोपिते मोक्षभागीये छन्दयोगाधिपत्यतः ॥६॥

आलम्बने असंमोषाविसारविचयस्य च।

आधिपत्यत इति वर्तते। ऋद्धिपादैः कर्मण्यचित्तस्यारोपिते मोक्षभागीये कुशलमूले छन्दाधिपत्यतः प्रयोगाधिपत्यतः आलम्बनासम्प्र[18a]मोषाधिपत्यतः अविसाराधिपत्यतः प्रविचयाधिपत्यतश्च यथाक्रमं पञ्च श्रद्धादीनीन्द्रियानि वेदितव्यानि॥

(ङ) पञ्च बलानि

तान्येव श्रद्धादीनि बलवन्ति[१] बलानीत्युच्यन्ते। तेषां पुनर्बलवत्त्वं—

विपक्षस्य लेखाद्

यदा तान्याश्रद्धयादिभिर्विपक्षैर्न व्यवकीर्यन्ते। कस्मात् श्रद्धादीनां पूर्वोत्तरनिर्देशः —

यस्मात्पूर्व[स्य] फलमुत्तरम् ॥७॥

श्रद्दधानो हि हेतुफले वीर्यमारभते। आरब्धवीर्यस्य स्मृतिरुपतिष्ठते। उपस्थितस्मृतेश्चित्तं समाधीयते। समाहितचित्तो यथाभूतं प्रजानाति। अवरोपितमोक्षभागीयस्य इन्द्रियाण्युक्तानि॥

अथ निर्वेधभागीयानि किमिन्द्रियावस्थायां वेदितव्यानि आहोस्विद् बलावस्थायाम्—

द्वौ द्वौ निर्वेधभागीयावि[२]न्द्रियाणि बलानि च।

ऊ(उ ?)ष्मगतं मूर्द्धानश्चेन्द्रियाणि। क्षान्तयो लौकिकाश्चाग्रधर्मा बलानि॥

---

१. Ms. here adds बलावन्ति। २. Ms. वी।

(च) सप्त बोध्यङ्गानि

बलानन्तरं बोध्यङ्गानि। तेषां कथं व्यवस्थानम्—

आश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकम् ॥८॥

चतुर्थमनुशंसाङ्गं निःक्लेशाङ्गं त्रिधा मतम् ।

दर्शनमार्गे बोधावङ्गानि बोध्य[1]ङ्गानि। तत्र बोधेराश्रयाङ्गं स्मृतिः। स्वभावाङ्गं धर्म[18b]विचयः। निर्याणाङ्गं वीर्यम्। अनुशंसाङ्गं प्रीतिः। असंक्लेशाङ्गं त्रिधा प्रस्रब्धिसमाध्युपेक्षाः। किमर्थं पुनरसंक्लेशाङ्गं त्रिधा देशितम्—

निदानेनाश्रयेणेह स्वभावेन च देशितम् ॥६॥

असंक्लेशस्य निदानं प्रस्रब्धिर्दौष्ठुल्यहेतुत्वात् संक्लेशस्य, तस्याश्च तत्प्रतिपक्षत्वात्। आश्रयः समाधिः। स्वभाव उपेक्षा ॥

(छ) अष्टमार्गाङ्गानि

बोध्यङ्गानन्तरं मार्गाङ्गाणि। तेषां कथं व्यवस्थानम्—

परिच्छेदोऽथ सम्प्राप्तिः परसम्भावना त्रिधा ।

विपक्षप्रतिपक्षश्च मार्गस्याङ्गं तदष्टधा ॥१०॥

भावनामार्गे[2] परिच्छेदा[3]ङ्गं सम्यग्दृष्टिः लौकिकी लोकोत्तरपृष्ठलब्धा यया स्वाधिगमं परिच्छिनत्ति। परसंप्रापणाङ्गं सम्यक्संकल्पः सम्यग्वाक्च ससमुत्थानया वाचा तत्प्रापणात्। परसम्भावनाङ्गं त्रिधा सम्यग्वाक्कर्मान्ताजीवाः। तैर्हि यथाक्रमम्—

दृष्टौ शीलेऽथ संलेखे परविज्ञप्तिरिष्यते ।

तस्य सम्यग्वाचा कथासांकथ्यविनिश्चयेन प्रज्ञायां सम्भावना भवति। सम्यक्कर्मान्तेन शीलेऽकृत्याकरणात्। सम्यगाजीवेन संलेखे, धर्मेण मात्रया च चीवराद्यन्वेषणात्। विपक्षप्रतिपक्षाङ्गं त्रिधैव सम्यग्व्यायामस्मृतिसमा[19a]धयः। एषां हि यथाक्रमम्—

---

1. ध्य is given at the bottom margin of the Ms. 2. Ms. has apparent स्य after र्गे। 3. Ms. has an additional syllable after दा।

क्लेशोपक्लेशवैभुत्वविपक्षप्रतिपक्षता ॥११॥

त्रिविधो हि विपक्षः । क्लेशो भावनाहेयः । उपक्लेशो लयौद्धत्यम् । विभुत्वविपक्षश्च वैशेषिकगुणाभिनिर्हारविबन्धः । तत्र प्रथमस्य [स]म्यग्व्यायामः प्रतिपक्षस्तेन मार्गभावनात् । द्वितीयस्य सम्यक्स्मृतिः शमथादिनिमित्तेषु सूपस्थितस्मृतेर्लयौद्धत्याभावात् । तृतीयस्य सम्यक्समाधिर्ध्यानसन्निश्रयेणाभिज्ञादिगुणाभिनिर्हारात् ॥

(ज) प्रतिपक्षभावनासमासः

सैषा प्रतिपक्षभावना समासेन त्रिविधा वेदितव्या—

अनुकूला विपर्यस्ता सानुबन्धाविपर्यया ।
अविपर्यस्ता विपर्यासान[1]नुबन्धा च भावना ॥१२॥

विपर्यस्तापि अविपर्यासानुकूला, अविपर्यस्ता विपर्यासानुबन्धा, अविपर्यस्ता विपर्या[स]निरनुबन्धा च यथाक्रमं पृथग्जनशैक्ष्याशैक्ष्यावस्थासु ॥

बोधिसत्त्वानां तु—

आलम्बन[मन]स्कारप्राप्तितस्तद्विशिष्टता ।

श्रावकप्रत्येकबुद्धानां हि स्वसान्तानिकाः कायादय आलम्बनम् । बोधिसत्त्वानां स्वपरसान्तानिकाः । श्रावकप्रत्येकबुद्धा अनित्यादिभिराकारैः कायादीन् मनसि कुर्वन्ति, बोधिसत्त्वास्त्वनुपलम्भयोगेन । श्रावकप्रत्येकबुद्धाः स्मृत्युपस्थानादी[19b]नि भावयन्ति यावदेव कायादीनां विसंयोगाय, बोधिसत्त्वा न विसंयोगाय नाविसंयोगाय यावदेवाप्रतिष्ठितनिर्वाणाय । उक्ता प्रतिपक्षभावना ॥

२. अवस्था

तत्रावस्था कतमा—

---

१. Ms. ना for न ।

हेत्ववस्थावताराख्या प्रयोगफलसंज्ञिता ॥१३॥

कार्याकार्यविशिष्टा च उत्तरानुत्तरा च सा ।
अधिमुक्तौ प्रवेशे च निर्याणे व्याकृतावपि ॥१४॥

कथिकत्वाभिषेके च सम्प्राप्तावनुशंसने ।
कृत्यानुष्ठा[न] उद्दिष्टा

तत्र हेत्ववस्था या[1] गोत्रस्थस्य पुद्गलस्यावतारावस्था उत्पादितबोधिचित्तस्य । प्रयोगावस्था चित्तोत्पादादूर्ध्वमप्राप्ते फले । फलावस्था प्राप्ते । सकरणीयावस्था शैक्षस्य । अकरणीयावस्था अशैक्षस्य । विशेषावस्थाभिज्ञादिगुणविशेषसमन्वा[ग]तस्य उत्तरावस्था श्रावकादिभ्यो भूमिप्रविष्टस्य बोधिसत्त्वस्य । अनु[2]त्तरावस्था बुद्धस्य, तत ऊर्ध्वमवस्थाभावात् । अधिमुक्त्यवस्था बोधिसत्त्वानां सर्वस्यामधिमुक्तिचर्याभूमौ । प्रवेशावस्था प्रथमायां भूमौ । निर्याणावस्था तदुत्तरासु षड्भूमिषु । व्याकरणावस्था[3] अष्टम्यां भूमौ । कथिकत्वावस्था नवम्याम् । अभिषेकावस्था दशम्याम् । प्राप्त्यवस्था बुद्धा[20a]नां धर्मकायः । अनुशंसावस्था सांभोगिकः कायः । कृत्यानुष्ठानावस्था निर्माणकायः । सर्वाप्येषा बहुविधावस्थाभिसमस्य वेदितव्या ॥

धर्मधातौ त्रिधा पुनः ॥१५॥

अशुद्धा[शुद्ध]शुद्धा च विशुद्धा च यथार्हतः ।

तत्राशुद्धावस्था हेत्ववस्थामुपादाय या[व]त् प्रयोगात् । अशुद्धशुद्धावस्था शैक्ष्याणाम् । विशुद्धावस्था अशैक्ष्याणाम् ॥

पुद्गलानामवस्थानं यथायोगमतो मतम् ॥१६॥

अतोऽवस्थाप्रभेदाद् यथायोगं पुद्गलानां व्यवस्थानं वेदितव्यम् । अयं गोत्रस्थोऽयमवतीर्ण इत्येवमादि । उक्तावस्था ॥

---

१. Ms. यो । २. After नु Ms. has a syllable which appears like व । ३. Ms. has वस्थ after स्था ।

३. फलप्राप्तिः

फलप्राप्तिः कतमा—

भाजनत्वं विपाकाख्यं बलं तस्याधिपत्यतः ।
रुचिर्वृद्धिर्विशुद्धिश्च फलमेतद्यथाक्रमम् ॥१७॥

भाजनत्वं यः कुशलानुकूलो विपाकः । बलं या भाजनत्वाधिपत्यात् कुशल[मूल]स्याधिमात्रता । रुचिर्या पूर्वाभ्यासात् कुशले रुचिः । वृद्धिर्या प्रत्युत्पन्ने कुशल[मूल]धर्माभ्यासात् कुशलमूलपरिपुष्टिः । विशुद्धिर्यदावरणप्रहाणम् । एतद् यथाक्रमं फलं पञ्चविधं वेदितव्यम् । विपाकफलमधिपतिफलं निष्यन्दफलं पुरुषकारफलं विसंयोगफलं च ॥

उत्तरोत्तरमाद्यं च तदभ्यासात्समाप्तितः ।
आनुकूल्याद्विपक्षाच्च विसंयोगाद्विशेषतः ॥१८॥

उत्तरानु[20b]त्तरत्वाच्च फलमन्यत्समासतः ।

उत्तरोत्तरफलं गोत्राच्चित्तोत्पाद इत्येवमादि परंपरया वेदितव्यम् । आदिफलं प्रथमलोकोत्तरधर्मप्रतिलम्भः । अभ्यासफलं तस्मात्परेण शैक्ष्यावस्थायाम् । समाप्तिफलम् अशैक्ष्या धर्माः । आनुकूल्यफलमुपनिषद्भावेनोत्तरोत्तरफलमेव वेदितव्यम् । विपक्षफलं प्रहाणमार्गो यदेवादिफलं प्रतिपक्षोऽभिम[1]तः । विसंयोगफलं निरोधसाक्षात्क्रिया । अभ्यासफलं समाप्तिफलं च क्लेशविसंयोगः शैक्ष्याशैक्ष्याणां यथाक्रमम् । विशेषफलमभिज्ञादिको गुणविशेषः । उत्तरफलं बोधिसत्त्वभूमयस्तदन्य[2]यानोत्तरत्वात् । अनुत्तरफलं बुद्धभूमिः । एतानि चत्वारि अभ्याससमाप्तिफलप्रभेद एव । एतदन्यत्फलं समासनिर्देशतः । व्यासतस्त्वपरिमाणम् ॥

४. प्रतिपक्षभावनापिण्डार्थः

तत्र प्रतिपक्षभावनायाः पिण्डार्थः— व्युत्पत्तिभावना, निर्लेखभावना, परिकर्मभावना, उत्तरोत्तरं समारम्भभावना, श्लिष्टभावना दर्शनमार्गश्लेषात्, प्रविष्टभावना,

---

१. म illegible in Ms. २. Ms. has additional त्र after न्य, which is redundant.

उत्कृष्टभावना, आदिभावना, मध्यभावना, पर्यवसानभावना च, सोत्तरा भावना, निरुत्तरा च भावना या आलम्बने मनस्काराप्राप्तिविशिष्टा ॥

५. अवस्थापिण्डार्थः

अवस्थानां [21a] पिण्डार्थः। भव्यतावस्था श्रोतःस्थस्य। आरम्भावस्था यावत् प्रयोगात्। अशुद्धावस्था, अशुद्धशुद्धावस्था, विशुद्धावस्था, सालङ्कारावस्था, व्याप्त्यवस्था दशभूमिव्यापनात्, अनुत्तरावस्था च ॥

६. फलपिण्डार्थः

फलानां पिण्डार्थः। संग्रहतस्तद्विशेषतः पूर्वाभ्यासत उत्तरोत्तरनिर्हारत उद्देशतो निर्देशतश्च। तत्र संग्रहतः पञ्च फलानि। तद्विशेषतः शेषाणि। पूर्वाभ्यासतो विपाकफलम्। उत्तरोत्तरनिर्हारतस्तदन्यानि चत्वारि। उद्देशत उत्तरोत्तरफलादीनि चत्वारि। निर्देशत आनुकूल्यफलादीनि षट् तेषामेव चतुर्णां निर्देशात् ॥

॥ मध्यान्तविभागे प्रतिपक्षभावनावस्थाफलपरिच्छेदश्चतुर्थः ॥

आनुत्तर्यपरिच्छेदः पञ्चमः

१. त्रिविधमानुत्तर्यम्

यानानुत्तर्यमिदानीं वक्तव्यम्। तदुच्यते—

आनुत्तर्यं प्रपत्तौ हि पुनरालम्बने मतम्।
समुदागम उद्दिष्टं

त्रिविधमानुत्तर्यं महायाने येनैतदनुत्तरं यानं, प्रतिपत्त्यानुत्तर्यमालम्बनानुत्तर्यं समुदागमानुत्तर्यं च ॥

२. प्रतिपत्त्यानुत्तर्यम्

तत्र प्रतिपत्त्यानुत्तर्यं दशपारमिताप्रतिपत्ति[1]तो वेदितव्यम् ॥

प्रतिपत्तिस्तु षड्विधा ॥१॥

अत्र पारमितासु—

परमार्थमनस्कारे अनुधर्मान्तवर्जने।
विशिष्टा चाविशिष्टा च

इत्येषा षड्विधा प्रतिपत्तिर्यदु[21b]त परमा प्रतिपत्तिर्मनस्कारप्रतिपत्तिरनुधर्मप्रतिपत्तिरन्तद्वयवर्जिता प्रतिपत्तिर्विशिष्टप्रतिपत्तिरविशिष्टप्रतिपत्तिः ॥

२ (क). परमा प्रतिपत्तिः

ततः—

परमा द्वादशात्मिका ॥२॥

---

१. Ms. has वे for पत्ति. There appears an indistinct पत्ति in the bottom margin, which might be correction for वे.

औदार्यमायतत्वं च अधिकारोऽक्षयात्मता ।
नैरन्तर्यमकृच्छ्रत्वं विभुत्वं च परिग्रहः ॥३॥

आरम्भप्राप्तिनिष्यन्दनिष्पत्तिः परमा मता ।

इत्येषा द्वादशविधा परमता। यदुतौदार्यपरमता आयतत्वपरमता अधिकारपरमता अक्षयत्वपरमता नैरन्तर्य[1]परमता अकृच्छ्रत्वपरमता विभुत्व[2]परमता परिग्रहपरमता आरम्भपरमता प्रतिलम्भपरमता निष्यन्दपरमता निष्पत्तिपरमता च। तत्रौदार्यपरमता सर्वलौकिकसम्पत्त्यनर्थित्वेनोत्कृष्टतया वेदितव्या। आयतत्वपरमता त्रिकल्पासंख्येयपरिभाव[3]नात्। अधिकारपरमता सर्वसत्त्वार्थक्रियाधिकारात्। अक्षयत्वपरमता महाबोधिपरिणामनयात्यन्तमपर्यादानात्। नैरन्तर्यपरमतात्म[4]परसमताधिमोक्षात् सर्वसत्त्वदानादिभिः पारमितापरिपूरणात्। अकृच्छ्रत्वपरमता अनुमोदनामात्रेण परदानादीनां पारमितापरिपूरणात्। विभुत्वपरमता[22a]गगनगञ्जसमाध्यादिभिर्दानादिपरिपूरणात्। परिग्रहपरमता निर्विकल्पज्ञानपरिगृहीतत्वात्। आरम्भपरमताधिमुक्तिचर्याभूमावधिमात्रायां क्षान्तौ। प्रति[5]लम्भपरमता प्रथमायां भूमौ। निष्यन्दपरमता तदन्यास्वष्टासु भूमिषु। निष्पत्तिपरमता दशम्यां भूमौ ताथागत्यां च बोधिसत्त्वनिष्पत्त्या बुद्धनिष्पत्त्या च॥

ततश्च परमार्थेन दश पारमिता मताः ॥४॥

यत एषा द्वादशविधा परमता एतासु संविद्यते ततः परमा इत्यनेनार्थेन दश पारमिताः॥

कतमा दशेत्येकेषां तन्नामव्युत्पादनार्थमुच्यते—

दानं शीलं क्षमा वीर्यं ध्यानं प्रज्ञा उपायता ।
प्रणिधानं बलं ज्ञानमेताः पारमिता दश ॥५॥

इति। किमासां प्रत्येकं कर्म—

---

१. Ms. नैरर्यन्त. २. Ms. has an illegible syllable between त्व and प. ३. Ms. has an additional भा after व. ४. Ms. has र after म, which appears unnecessary. ५. Ms. त; Y. ति.

अनुग्रहोऽविघातश्च कर्म तस्य च मर्षणा ।
गुणवृद्धिश्च [सत्त्वानाम्] अवतारविमोचने ॥६॥

अ[1]क्षयत्वं सदावृत्तिर्नियतिर्भोगपाचने ।

इत्येतदासां कर्म यथाक्रमम् । दानेन हि बो[धि]सत्त्वः सत्त्वाननुगृह्णाति । शीलेनोपघातं परेषां न करोति । क्षान्त्या परैः कृतमुपघातं मर्षयति । वीर्येण गुणान् वर्धयति । ध्यानेनर्द्ध्यादिभिरावर्ज्यावतारयति । प्रज्ञया सम्यगववाददानाद् विमोचयति । उपायकौ[22b]शल्यपारमितया महाबोधिपरिणामनाद्दानादीनक्षयान् करोति । प्रणिधानपारमितयानुकूलोपपत्तिपरिग्रहात् सर्वजन्मसु बुद्धोत्पादारागणतो दानादिषु सदा प्रवर्तते । बलपारमितया प्रतिसंख्यानभावना[2]बलाभ्यां नियतं दानादिषु प्रवर्तते, विपक्षानभिभवात् । ज्ञानपारमितया यथारुतधर्मसंमोहापगमाद्दानाद्याधिपतेयधर्मसम्भोगं च प्रत्यनुभवति सत्त्वांश्च परिपाचयति । उक्ता परमा प्रतिपत्तिः ॥

२ (ख). मनस्कारप्रतिपत्तिः

मनसिकारप्रतिपत्तिः कतमा—

यथाप्रज्ञप्तितो धर्मे महायानमनस्क्रिया ॥७॥

बोधिसत्त्वस्य सततं प्रज्ञया त्रिप्रकारया ।

दानादीन्यधिकृत्य यथाप्रज्ञप्तानां सूत्रादिधर्माणां महायाने मनसिकरणमभीक्ष्णं श्रुतचिन्ताभावनामय्या प्रज्ञया मनसिकारप्रतिपत्तिः । सा त्रिप्रकारया प्रज्ञया मनसिक्रिया कं गुणमावहति—

धातुपुष्ट्यै प्रवेशाय चार्थसिद्ध्यै भवत्यसौ ॥८॥

तत्र श्रुतमय्या प्रज्ञया मनसिकुर्वतो धातुपुष्टिर्भवति । चिन्तामय्या तस्य श्रुतस्यार्थं भावेन प्रविशति । भावनामय्यार्थसिद्धिं प्राप्नोति, भूमिप्रवेशपरिशोधनात् ॥

१. Ms. has additional प after अ । २. Y. °भावनाभ्यां । ३. Ms. द्धं ।

संयुक्ता[1] धर्मचरितैः सा ज्ञेया दशभिः [23a] पुनः ।

सा पुनर्मनसिकारप्रतिपत्तिर्दशभिर्धर्मचरितैः परिगृहीता वेदितव्या। कतमद् दशधा धर्मचरितम्—

लेखनं[2] पूजना दानं श्रवणं वाचनोद्ग्रहः ॥९॥

प्रकाशनाथ स्वाध्यायश्चिन्तना भावना च तत् ।

महायानस्य लेखनं, पूजनं, परेभ्यो दानं, परेण वाच्यमानस्य श्रवणं, स्वयं च वाचनम्, उद्ग्रहणं, परेभ्यः प्रका[3]शनं ग्रन्थस्यार्थस्य वा स्वाध्यायनं, चिन्तनं भावनं च ॥

अमेयपुण्यस्कन्धं हि चरितं तद्दशात्मकम् ॥१०॥

कस्मान्महायान एव धर्मचरितमत्यन्तं महाफलं देश्यते, न पुनः श्रावकयाने। द्वाभ्यां कारणाभ्याम्—

विशेषादक्षयत्वाच्च

कथं विशेषात् कथमक्षयत्वात्—

परानुग्रहतोऽशमात् ।

परानुग्रहवृत्तित्वाद्विशिष्टत्वं परिनिर्वाणेऽप्यशमान्न तूपरमादक्षयत्वं वेदितव्यम्। उक्ता मनसिकारप्रतिपत्तिः ॥

२ (ग). अनुधर्मप्रतिपत्तिः

अनुधर्मप्रतिपत्तिः कतमा—

---

१. Ms. appears to have additional प्र after सं. २. Ms. नां for नं.
३. Ms. appears to have देशो for प्रका.

अविक्षिप्ताविपर्या[1]सपरिणता[2]नुधार्मिकी ॥११॥

इत्येषा द्विविधानुधर्मप्रतिपत्तिर्यदुताविक्षिप्ता चाविपर्यासपरिणता च ॥

(अ) अविक्षिप्तपरिणता

तत्र षड्विधविक्षेपाभावादविक्षिप्ता। तत्र षड्विधो विक्षेपः— प्रकृतिविक्षेपो [23b]बहिर्धाविक्षेपः अध्यात्मविक्षेपो निमित्तविक्षेपो दौष्ठुल्यविक्षेपो मनसिकार-विक्षेपश्च। स चात्र[3] किंलक्षणो वेदितव्य इत्यत आह—

व्युत्थानं विषये सारस्तथास्वादलयोद्ध[4]वः।
सम्भावनाभिसन्धिश्च मनस्कारोऽप्यहंकृतिः ॥१२॥
हीनचित्तं तु विक्षेपः परिच्छेदे हि धीमता।

[5]इत्येवंलक्षणः षड्विधो विक्षेपोत्पादस्तत्र सहेतुः परिज्ञेयः। [5]तत्र व्युत्थानं समाधितः पञ्चभिर्विज्ञानकायैः प्रकृतिविक्षेपः। विषये सारो[6] बहिर्धाविक्षेपः। समाधेरास्वादना लयौद्धत्यं चाध्यात्मविक्षेपः। सम्भावनाभिसन्धिर्निमित्तविक्षेपः, तन्निमित्तं कृत्वा प्रयोगात्। साहंकारमनस्कारता दौष्ठुल्यविक्षेपो, दौष्ठुल्यवशेनास्मिमानसमुदाचारात्। हीनचित्तत्वं मनसिकारविक्षेपो, हीनयानमनसिकारसमुदाचारात् ॥

(आ) अविपर्यासपरिणता

तत्राविपर्यासो दशविधे वस्तुनि वेदितव्यः। यदुत—

व्यञ्जनार्थमनस्काराविसारे लक्षणद्वये ॥१३॥
दौष्ठुल्य[7]शुद्धावागन्तुकत्वेऽत्रासे अनुन्नतौ।

तत्र—

---

१. Here after या Ms. inserts (द्वाभ्यां कारणाभ्यां विशेषादत्ययत्वाच्च) which is bracketed in the Ms. to show that it is repeated by mistake. The passage is found on p. 40 lines 11–12 above. । २. Ms. प्रणतावा for परिणता । ३. स चात्र doubtful in Ms. ४. Ms. appears to have an additional syllable appearing like य after द्ध । ५. Ms. quite indistinct ६. Ms. विसारो for सारो । ७. दौष्ठुल्य doubtful in Ms.

संयोगात्सम्भवाच्चैव वियोगादप्यसम्भवात् ॥१४॥

अर्थसत्त्वमसत्त्वं च व्यञ्जने सोऽविपर्ययः ।

संयोगे सति व्यञ्जनानाम[24a]विच्छिन्नोच्चारणतयास्य चेदं नामेति संभवात्सार्थकत्वम्, विपर्ययान्निरर्थकत्वमिति यदेवं दर्शनं सोऽविपर्यासो व्यञ्जने वेदितव्यः ॥

तत्कथमर्थेऽविपर्यासः—

द्वयेन प्रतिभासत्वं तथा चाविद्यमानता ॥१५॥

अर्थे स चाविपर्यासः सदसत्त्वेन वर्जितः ।

द्वयेन ग्राह्यग्राहकत्वेन प्रतिभासते तदाकारोत्पत्तितः । तथा च न विद्यते यथा प्रतिभासत इति । अर्थे[1] यद् दर्शनं स तत्राविपर्यासः । अर्थस्य सत्त्वेन वर्जितो ग्राह्यग्राहकाभा[2]वात् । असत्त्वेन[2] वर्जितस्तत्प्रतिभास[3]भ्रान्तिसद्भावात् ॥

तज्जल्पभावितो जल्पमनस्कारस्तदाश्रयः ॥१६॥

मनस्कारेऽविपर्यासो द्वयप्रख्यानका[र]णे ।

ग्राह्यग्राहकजल्पपरिभावितो जल्पमनस्कारस्तस्य ग्राह्यग्राहकविकल्पस्याश्रयो भवतीत्ययं मनस्कारेऽविपर्यासः । कतमस्मिन् मनस्कारे । ग्राह्यग्राहकसंप्रख्यानकारणे । स ह्यसौ जल्पमनस्कारोऽभिलापसंज्ञापरिभावितत्वाद्ग्राह्यग्राहकविकल्पाश्रयो वेदितव्यः ॥

मायादिवदसत्त्वं च सत्त्वं चार्थस्य तन्मतम् ॥१७॥

सोऽविसारेऽविपर्यासो भावाभावाविसारतः ।

---

१. अर्थे illegible in Ms. २...२. Ms. वादत्वेसत्वेन, first त्वे appearing struck through. ३. प्रतिभास can be read as परिज्ञान in Ms.

यत्तदर्थस्यासत्त्वं सत्त्वं चान[1]न्तरमुक्तं [24b] तन्मायादिवन्मतम् । यथा माया न हस्त्यादिभावेनास्ति, न च नैवास्ति, तद्भ्रान्तिमात्रास्तित्वात्, एवमर्थोऽपि न चास्ति यथा संप्रख्याति ग्राह्यग्राहकत्वेन, न च नैवास्ति तद्भ्रान्तिमात्रास्तित्वात् । आदिशब्देन मरीचिस्वप्नो[2]दकचन्द्रादयो दृष्टान्ता यथायोगं वेदितव्या इति यन्मायाद्युपमार्थे दर्शनादविसारं चेतसः पश्यति सोऽविसारेऽविपर्यासस्तेन भावाभावयोश्चित्तस्याविसरणात् ॥

सर्वस्य नाममात्रत्वं सर्वकल्पाप्रवृत्तये ॥१८॥

स्वलक्षणेऽविपर्यासः

सर्वमिदं नाममात्रं यदिदं चक्षूरूपं यावन्मनोधर्मा इति यज्ज्ञानं सर्वविकल्पानां प्रतिपक्षेण । अयं स्वलक्षणेऽविपर्यासः । कतमस्मिन् स्व[3]लक्षणे—

परमार्थे स्वलक्षणे ।

संवृत्या तु नेदं नाममात्रमिति गृह्यते ॥

धर्मधातुविनिर्मुक्तो यस्माद्धर्मो न विद्यते ॥१९॥

सामान्यलक्षणं तस्मात् स च तत्राविपर्ययः ।

न हि धर्मनैरात्म्येन विना कश्चिद्धर्मो विद्यते तस्माद् धर्मधातुः सर्वधर्माणां सामान्यं लक्षणमिति यदेवं ज्ञानम्, अयं सामान्यलक्षणेऽविपर्यासः ॥

विपर्यस्तमनस्काराविहानिपरिहानिता ॥२०॥

तदशुद्धिर्विशुद्धिश्च स च तत्राविपर्ययः ।

---

१. Ms. has additional त after न, which however appears struck through. २. Ms. प्न for प्नो । ३. Ms. has additional त after स्व, which appears struck through.

विपर्यस्तमनस्काराप्रहाणं तस्य धर्मधातोरविशुद्धिस्तत्प्रहाणं विशुद्धिरिति यदेवं ज्ञानम्, अयमविशुद्धौ विशुद्धौ चाविपर्यासो यथाक्रमम् ॥

धर्मधातोर्विशुद्धत्वात्प्रकृत्या व्योमवत्पुनः ॥२१॥

द्वयस्यागन्तुकत्वं हि स च तत्रा[25a]विपर्ययः ।

धर्मधातोः पुनराकाशवत् प्रकृतिविशुद्धत्वाद् द्वयमप्येतदागन्तुकमविशुद्धि[र्विशुद्धि]श्च पश्चादिति यदेवं ज्ञानम्, अयमागन्तुकत्वेऽविपर्यासः ॥

संक्लेशश्च विशुद्धिश्च धर्मपुद्गलयोर्न हि ॥२२॥

असत्त्वात्त्रासतामानौ नातः सोऽत्राविपर्ययः ।

न हि पुद्गलस्य संक्लेशो न विशुद्धिर्नापि धर्मस्य, यस्मान्न पुद्गलोऽस्ति न धर्मः । यतश्च न कस्यचित् कर्मसंक्लेशो न व्यवदानम्, अतो न संक्लेशपक्षे कस्यचिद्धानिर्न व्यवदानपक्षे कस्यचिद्विशेषो यतस्त्रासो वा स्यादुन्नतिर्वेत्ययमत्रासेऽनुन्नतौ चाविपर्यासः ॥

दश वज्रपदानि

एते च दशाविपर्यासा दशसु वज्रपदेषु यथाक्रमं योजयितव्याः । दश वज्रपदानि–सदसत्ताऽविपर्या[1]स आश्रयो मायोपमता अविकल्पनता प्रकृतिप्रभास्वरता संक्लेशो व्यवदानमाकाशोपमता अहीनता विशिष्टता च ॥

वज्रपदानां शरीरव्यवस्थानं स्वभावत आलम्बनतोऽविकल्पनतश्चोद्यपरिहारतश्च । तत्र स्वभावतस्त्रयः स्वभावाः परिनिष्पन्नपरिकल्पितपर[त]न्त्राख्या आद्यैस्त्रिभिः पदैर्यथाक्रमम् । आलम्बनतस्त एव । अविकल्पनतो येन न विकल्पयति निर्वि[25b]कल्पेन ज्ञानेन यच्च न विकल्पयति प्रकृतिप्रभास्वरताम् । तदनेन ज्ञेयज्ञानव्यवस्थानं यथाक्रमं वेदितव्यं यदुत त्रिभिः स्वभावैरविकल्पनतया च । चोद्यपरिहारतः शिष्टानि पदानि । तत्रेदं चोद्यम्—यद्यते परिकल्पितपरतन्त्रलक्षणा धर्मा न संविद्यन्ते, कथमुपलभ्यन्ते । अथ संविद्यन्ते धर्माणां प्रकृतिप्रभास्वरता न युज्यते । तन्मायोपमतया परिहरति— यथा मायाकृतं न विद्यते उपलभ्यते च । यदि प्रकृतिप्रभास्वरता धर्माणां तत्कथं पूर्वं संक्लेशः पश्चाद् व्यवदानम् । अस्य परिहारः— संक्लेशव्यवदानमाका-

१. Ms. has यँ for र्या ।

शोपमतया वेदितव्यम् । यथाकाशं प्रकृतिपरिशुद्धं संक्लिश्यते व्यवदायते चेति। यद्यप्रमेयबुद्धोत्पादे सति अप्रमेयाणां सत्त्वानां संक्लेशोपशमः तत्कथं न संसारसमुच्छेदो न निर्वाणवृद्धिर्भवति। तस्याहीनाविशिष्टतया परिहारः । अप्रमेयत्वात् सत्त्वधातोर्व्यवदानपक्षस्य च ।

द्वितीयं शरीरव्यवस्थानम्[1]—

यत्र या च यतो भ्रान्ति[रभ्रान्ति]र्या च यत्र च ।
भ्रान्त्यभ्रान्तिफले चैव पर्यन्तश्च तयोरिति ॥

सदसत्ताविपर्यास आश्रयो माययोपमा ।
अकल्पना प्रकृत्या च भास्वरत्वं सदैव हि ॥

[26a] संक्लेशो व्यवदानं च आकाशोपमता तथा ।
अहीनानधिरूपं च दश वज्रपदानि हि ॥

उक्तानुधर्मप्रतिपत्तिः ॥

२ (घ). अन्तद्वयवर्जनप्रतिपत्तिः

अन्तद्वयवर्जने प्रतिपत्तिः कतमा या रत्नकूटे मध्यमा प्रतिपत्तिरुपदिष्टा। कस्यान्तस्य वर्जनायासौ वेदितव्या—

पृथक्त्वैकत्वमन्तश्च तीर्थ्यश्रावकयोरपि ॥२३॥

समारोपापवादान्तो द्विधा पुद्गलधर्मयोः ।
विपक्षप्रतिपक्षान्त[ः] शाश्वतोच्छेदसंज्ञितः ॥२४॥

ग्राह्यग्राहकसंक्लेशव्यवदाने द्विधर्मता ।
विकल्पद्वयतान्त[त्व]त्स च सप्तविधो मतः ॥२५॥

---

१. नम् illegible in Ms.

भावाभावे प्रशाम्येऽथ शमनेनास्य तद्ग्रहः ।
ग्राह्यग्राहकसम्यक्त्वमिथ्यात्वे व्यापृतौ न च ॥२६॥

अजन्मसमकालत्वे सविकल्पा द्वयान्तता ।

तत्र रूपादिभ्यः पृथक्त्वमात्मन इत्यन्तः । एकत्वमित्यन्तः । तत्परिवर्जनार्थं मध्यमा प्रतिपत् । मया नात्मप्रत्यवेक्षा यावन्न मानवप्रत्यवेक्षा । आत्मदर्शने हि [स]जीवस्तच्छरीरं अन्यो जीवोऽन्यच्छरीरमिति भवति दर्शनम् ।

नित्यं रूपमिति तीर्थिकान्तः । अनित्यमिति श्रावकान्तः । तत्परिवर्जनार्थं मध्यमा प्रतिपत् या रूपादीनां न नित्यप्रत्यवेक्षा नानित्यप्रत्यवेक्षा ।

आत्मेति पुद्गलसमारोपान्तो नै[26b]रात्म्यमित्यपवादान्तः प्रज्ञप्तिसतो अप्यपवादात् । तत्परिवर्जनार्थं मध्यमा प्रतिपत् यदात्मनैरात्म्ययोर्मध्यं निर्विकल्पं ज्ञानम् ।

भूतं चित्तमिति धर्मसमारोपान्तः । अभूतमित्यपवादान्तः । तत्परिवर्जनार्थं मध्यमा प्रतिपद् यत्र न चित्तं न चेतना न मनो न विज्ञानम् ।

अकुशलादयो धर्माः संक्लेश इति विपक्षान्तः । कुशलादयो व्यवदानमिति [प्रति]पक्षान्तः । तत्परिवर्जनार्थं मध्यमा प्रतिपद् योऽस्यान्तद्वयस्यानुपगमोऽनुदाहारो अप्रव्याहारः ।

अस्तीति शाश्वतान्तस्तयोरेव पुद्गलधर्मयोर्नास्तीत्युच्छेदान्तः । तत्परिवर्जनार्थं मध्यमा प्रतिपद्यदनयोर्द्वयोरन्तयोर्मध्यम् ।

अविद्या ग्राह्या ग्राहिका चेत्यन्तः । एवं विद्या संस्काराश्चा[1]संस्कृतं च तत्प्रतिपक्षो यावज्जरामरणं ग्राह्यं ग्राहकं चेत्यन्तस्तन्निरोधो ग्राह्यो ग्राहको वेत्यन्तो येन मार्गेण तन्निरुध्यते । एवं ग्राह्यग्राहकान्तो द्विधा कृष्णशुक्लपक्षभेदेन । तत्परिवर्जनार्थं मध्यमा प्रतिपद् विद्या चाविद्या चाद्वयमेतदिति विस्तरेण विद्याविद्यादीनां ग्राह्यग्राहकत्वाभावात् ।

त्रिविधः संक्लेशः— क्लेशसंक्लेशः [27a] कर्मसंक्लेशो जन्मसंक्लेशश्च ।

---

१. Ms. श्च for श्चा ।

तत्र क्लेशसंक्लेशस्त्रिविधः — दृष्टिः रागद्वेषमोहनिमित्तं पुनर्भवप्रणिधानं च, यस्य प्रतिपक्षो ज्ञानशून्यता ज्ञानानिमित्तं ज्ञानप्रणिहितं च। कर्मसंक्लेशः शुभाशुभकर्माभिसंस्कारो यस्य प्रतिपक्षो ज्ञानानभिसंस्कारः। जन्मसंक्लेशः पुनर्भवजातिर्जातस्य चित्तचैत्तानां प्रतिक्षणोत्पादः पुनर्भवप्रबन्धश्च यस्य प्रतिपक्षो ज्ञानाजातिर्ज्ञानानुत्पादो ज्ञानास्वभावता च। एतस्य त्रिविधस्य संक्लेशस्यापगमो व्यवदानम्। तत्र ज्ञानशून्यतादिभिर्ज्ञेयशून्यतादयो धर्मा एतेन त्रिविधेन संक्लेशेन यथायोगं यावन्न शून्यतादयः क्रियन्ते प्रकृत्यैव शून्यतादयो धर्मधातोः प्रकृत्यसंक्लिष्टत्वात्। तत्र यदि धर्मधातुः संक्लिश्यते च विशुध्यते चेति कल्प[य]त्ययमन्तः प्रकृत्यसंक्लिष्टस्य संक्लेशविशुद्ध्यभावात्। एतस्यान्तस्य परिवर्जनार्थं मध्यमा प्रतिपद् यन्न शून्यतया धर्मान् शून्यान् करोति, अपि तु धर्मा एव शून्या इत्येवमादि॥

अपरः सप्तविधो विकल्पद्वयान्तस्तद्यथा—भावेऽपि विकल्पोऽन्तोऽभावेऽपि पुद्गलोऽस्ति यस्य वि[27b]नाशाय शून्यता नैरात्म्यमपि वा नास्तीति कल्पनात्। तदेतस्य विकल्पद्वयान्तस्य परिवर्जनार्थमियं मध्यमा प्रतिपत्— न खलु पुद्गलविनाशाय शून्यता अपि तु शून्यतैव शून्या। पूर्वान्तशून्यता अपरान्तशून्यता प्रत्युत्पन्नशून्यता[1] इत्येवमादि विस्तरः॥

शाम्येऽपि विकल्पोऽन्तः शमनेऽपि विकल्पोऽन्तः प्रहेयप्रहाणकल्पनया शून्यतायास्त्रसनात्। एतस्य विकल्पद्वयान्तस्य परिवर्जनार्थमाकाशदृष्टान्तः॥

त्रास्ये[2]ऽपि विकल्पोऽन्तस्ततश्च त्रास्याद्भयेऽपि, परिकल्पितरूपादित्रसनाद् दुःखभीरुतया। एतस्य विकल्पद्वयान्तस्य परिवर्जनार्थं चित्रकरदृष्टान्तः। पूर्वको दृष्टान्तः श्रावकानारभ्य, अयं तु बोधिसत्त्वान्॥

ग्राह्येऽपि विकल्पोऽन्तो ग्राहकेऽपि। एतस्य विकल्पद्वयान्तस्य परिवर्जनार्थं मायाकारदृष्टान्तः। विज्ञप्तिमात्रज्ञानकृतं ह्यर्थाभावज्ञानम्। तच्चार्थाभावज्ञानं तदेव विज्ञप्तिमात्रज्ञानं निवर्तयति, अर्थाभावे विज्ञप्त्यसंभवादिति तत्र साधर्म्यम्॥

---

१. प्रत्युत्पन्नशून्यता is given in the top margin of Ms. It is very indistinct. २. Ms. has additonal वि after स्ये।

सम्यक्त्वेऽपि विकल्पोऽन्तो मिथ्यात्वेऽपि, भूतप्रत्यवेक्षां सम्यक्त्वेन कल्पयतो मिथ्यात्वेन वा। एतस्यान्तद्वयस्य परिवर्जनार्थं काष्ठद्वयाग्निदृष्टान्तः। यथा [28a] काष्ठद्वयादनग्निलक्षणादग्निर्जायते, जातश्च तदेव काष्ठद्वयं दहति। एवमसम्यक्त्व-लक्षणाया यथाभूतप्रत्यवेक्षायाः सम्यक्त्वलक्षणमार्यं प्रज्ञेन्द्रियं जायते। जातं च तामेव भूतप्रत्यवेक्षां विभावयति। इत्येतदत्र साधर्म्यम्। न चासम्यक्त्वलक्षणाऽपि भूत-प्रत्यवेक्षा मिथ्यात्वलक्षणा सम्यक्त्वानुकूल्यात्॥

व्यापृतावपि विकल्पोऽन्तोऽव्यापृतावपि ज्ञानस्य बुद्धिपूर्वां क्रियां निःसामर्थ्यं वा कल्पयतः। एतस्य विकल्पद्वयान्तस्य परिवर्जनार्थं तैलप्रद्योतदृष्टान्तः॥

अजन्मत्वेऽपि विकल्पोऽन्तः समकालत्वेऽपि, यदि प्रतिपक्षस्यानुत्पत्तिं वा कल्पयति संक्लेशस्यैव वा दीर्घकालत्वम्। एतस्य विकल्पद्वयान्तस्य परिवर्जनार्थं द्वितीयस्तैलप्रद्योतदृष्टान्तः। उक्ताऽन्तद्वयपरिवर्जने प्रतिपत्तिः॥

२ (ङ—च) विशिष्टाविशिष्टप्रतिपत्तिः

विशिष्टा चाविशिष्टा च प्रतिपत्तिः कतमा—

विशिष्टा चाविशिष्टा च ज्ञेया दशसु भूमिषु ॥२७॥

यस्यां भूमौ या पारमितातिरिक्ततरा सा तत्र विशिष्टा। सर्वासु च सर्वत्र समुदागच्छतीत्यविशिष्टा। उक्तं प्रतिपत्त्यानुत्तर्यम्॥

३. आलम्बनानुत्तर्यम्

आलम्बनानुत्तर्यं कतमत्—

व्यवस्थानं ततो धातुः साध्यसाधनधारणा।
अवधार[28b]प्रधारा च प्रतिवेधः प्रतानता ॥२८॥

प्रगमः प्रसठत्वं च प्रकर्षालम्बनं मतम्।

इत्येतद्द्वादशविधमालम्बनम् यदुत धर्मप्रज्ञप्तिव्यवस्थानालम्बनं धर्मधात्वालम्बनं साध्यालम्बनं साधनालम्बनं धारणालम्बनमवधारणालम्बनं प्रधारणालम्बनं प्रतिवेधालम्बनं प्रतानतालम्बनं प्रगमालम्बनं प्रसठतालम्बनं प्रकर्षालम्बनं च। तत्र प्रथमं ये पारमितादयो धर्मा व्यवस्थाप्यन्ते। द्वितीयं तथ[1]ता। तृतीयचतुर्थे त एव यथाक्रमं धर्मधातुप्रतिवेधेन पारमितादिधर्माधिगमात्। पञ्चमं श्रुतमयज्ञानालम्बनम्। षष्ठं चिन्तामयस्यावगम्य धारणात्। सप्तमं भावनामयस्य प्रत्यात्मं धारणात्। अष्टमं प्रथमायां भूमौ दर्शनमार्गस्य। नवमं भावनामार्गस्य यावत्सप्तम्यां भूमौ। दशमं तत्रैव लौकिकलोकोत्तरस्य मार्गस्य प्रकारशो धर्माधिगमात्। एकादशमष्टम्यां भूमौ द्वादशं नवम्यादिभूमित्रये। तदेव हि प्रथमद्वयं तस्यां तस्यामवस्थायां तत्तदालम्बनं नाम लभते। उक्तमालम्बनम् ॥

४. समुदागमानुत्तर्यम्

समुदागमः कतमः—

अवैकल्याप्रतिक्षेपो[2]ऽविक्षेपश्च[29a]प्रपूरणा ॥२९॥

समुत्पादनिरूढिश्च कर्मण्यत्वाप्रतिष्ठ[3]ता।

निरावरणता तस्याप्रस्रब्धिः समुदागमः ॥३०॥

इत्येष दशविधः समुदागमः। तत्र प्रत्ययावैकल्यं गोत्रसमुदागमः। महायानाप्रतिक्षेपो अधिमुक्तिसमुदागमः। हीनयानाविक्षेपश्चित्तोत्पादसमुदागमः। पारमितापरिपूरणा प्रतिपत्तिसमुदागमः। आर्यमार्गोत्पादो नियामावक्रान्तिसमुदागमः। कुशलमूलनिरूढित्वं दीर्घकालपरिचयात्सत्त्वपरिपाकसमुदागमः। चित्तकर्मण्यत्वं क्षेत्रपरिशुद्धिसमुदागमः। संसारनिर्वाणाप्रतिष्ठता अविनिवर्तनीयभूमिव्याकरणलाभसमुदागमः संसारनिर्वाणाभ्यामविनिवर्तनात्[4]। निरावरणता बुद्धभूमिसमुदागमः। तदप्रस्रब्धिर्बोधिसन्दर्शनसमुदागमः। इत्येतत्

शास्त्रं मध्यविभागं हि

---

१. Ms. has additional था after थ। २. Ms. पक्षो for क्षेपो। ३. Ms. ष्ठि for ष्ठ। ४. विनिवर्तनात् doubtful in Ms.

मध्यमा प्रतिपत्प्रकाशनान्मध्यान्तविभागमप्येतन्मध्यस्यान्तयोश्च प्रकाशनात्। [१]अस्य परिवर्जितस्य मध्यस्य वा[१]

ग्रहः सारार्थमेव च।

तर्कस्यागोचरत्वात् परवादिभिरभेद्यत्वाच्च यथाक्रमम्।

महार्थं चैव

स्वपराधिकारात्।

सर्वार्थम्

यानत्रयाधिकारात्।

सर्वानर्थप्रणो[29b]दनम् ॥३१॥

क्लेशज्ञेयावरणप्रहाणावाहनात् ॥

५. आनुत्तर्यपिण्डार्थः

आनुत्तर्यपिण्डार्थः। समासतस्त्रिविधमानुत्तर्यम्—प्रतिपत्तिः प्रतिपत्त्याधारः प्रति[पत्ति]फलं चैव। सा च प्रतिपत्तिर्यादृशी परमा येन च

यथाप्रज्ञप्तितो धर्मे महाय.नमनस्क्रिया

इत्येवमादिना यथा येन प्रकारेण विक्षेपपरिणता च शमथभावनया अविपर्यासपरिणता च विपश्यनाभावनया, यदर्थं च मध्यमया प्रतिपदा निर्याणार्थं येऽत्र च दशसु भूमिषु विशिष्टा चाविशिष्टा च ॥

६. अविपर्यासपिण्डार्थः

अविपर्यासानां पिण्डार्थः। व्यञ्जनाऽविपर्यासेन शमथमेव[२] निमित्तं प्रतिविध्यति। अर्थाविपर्यासेन विपश्यनानिमित्तं प्रतिविध्यति। मनस्काराविपर्यासेन

१...१. Ms. illegible. २. Ms. has न for व।

विपर्यासनिदानं परिवर्जयति। अविसाराविपर्यासेन तन्निमित्तमुद्गृहीतं करोति। स्वलक्षणाविपर्यासेन तत्प्रतिपक्षेणाविकल्पं मार्गं भावयति। सामान्यलक्षणाविपर्यासेन व्यवदानप्रकृतिं प्रतिविध्यति। अशुद्धिशुद्धिमनस्काराविपर्यासेन तदावरणप्रहीणतां प्रजानाति। तदागन्तुकत्वाविपर्यासेन संक्लेशव्यवदानं यथाभूतं प्रजानाति। अत्रासानुन्नत्यविपर्यासेन निरावरणो निर्याति ॥

॥ आ[¹30a]नुत्तर्यपरिच्छेदः पञ्चमः ॥

॥ समाप्तो मध्यान्तविभागः ॥

व्याख्यामिमामुपनिबध्य यदस्ति पुण्यं
पुण्योदयाय महते जगतस्तदस्तु।
ज्ञानोदयाय च यतोऽभ्युदयं महान्तं
बोधित्रयं च न चिराज्जगदश्नुवीत ॥

इति मध्यान्तविभागकारिकाभाष्यं समाप्तम् ॥

॥ कृतिराचार्यभदन्त व सु ब न्धोः ॥

१. Ms. does not give the folio number.

मध्यान्तविभागकारिकागतश्लोकार्धसूची

[आद्या संख्या अध्यायं द्वितीया च श्लोकं निर्दिशतः]

मध्यान्तविभागभाष्यस्थितश्लोकार्धसूची

[अङ्काः पृष्ठसूचकाः]